# संस्कृतभाषाशास्त्रम्

## Course Code: B21SN04DE

Discipline Specific Elective Course
Undergraduate Programme in
Sanskrit Language and Literature
Self Learning Material




**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

# संस्कृतभाषाशास्त्रम्

Course Code: B21SN04DE

Semester - V

## Discipline Specific Elective Course
## Undergraduate Programme
## Sanskrit Language and Literature
## Self Learning Material

**(With Model Question Paper Sets)**

SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

SREENARAYANAGURU
OPEN UNIVERSITY

# संस्कृतभाषाशास्त्रम्

Course Code: B21SN04DE
Semester- V
Discipline Specific Elective Course
BA Sanskrit Language and Literature

**Academic Committee**

Dr. C.T. Francis
Dr. Sreeja Priyadharshini
Dr. Smitha Sabu
Dr. K. Ratheesh
Dr. Jeena George
Dr. R. Maniyappan
Dr. Thara K.V.
Dr. K. Retheesh
Dr. M. Harinarayanan Mankulathillath
Dr. Susanth S.

**Development of the Content**

Dr. Jyotsna G.
V. Madhavan Pillai
Dr. V.R. Muralidharan

**Review and Edit**

Dr. G. Sahadevan

**Linguistics**

Dr. G. Sahadevan

**Scrutiny**

Dr. Sreeja J.
Dr. Vijayarajan K.U.
Chitra Bhaskar
Dr. Jothilekshmi M.
Anju J.

**Design Control**

Azeem Babu T.A.

**Cover Design**

Jobin J.

**Co-ordination**

Director, MDDC :
Dr. I.G. Shibi
**Asst. Director, MDDC :**
Dr. Sajeevkumar G.
**Coordinator, Development:**
Dr. Anfal M.
**Coordinator, Distribution:**
Dr. Sanitha K.K.

Scan this QR Code for reading the SLM on a digital device.

**Edition**
January 2025

**Copyright**
© Sreenarayanaguru Open University

ISBN 978-81-982562-6-3

All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.

www.sgou.ac.in

Visit and Subscribe our Social Media Platforms

# MESSAGE FROM VICE CHANCELLOR

Dear learner,

I extend my heartfelt greetings and profound enthusiasm as I warmly welcome you to Sreenarayanaguru Open University. Established in September 2020 as a state-led endeavour to promote higher education through open and distance learning modes, our institution was shaped by the guiding principle that access and quality are the cornerstones of equity. We have firmly resolved to uphold the highest standards of education, setting the benchmark and charting the course.

The courses offered by the Sreenarayanaguru Open University aim to strike a quality balance, ensuring students are equipped for both personal growth and professional excellence. The University embraces the widely acclaimed "blended format," a practical framework that harmoniously integrates Self-Learning Materials, Classroom Counseling, and Virtual modes, fostering a dynamic and enriching experience for both learners and instructors.

The University aims to offer you an engaging and thought-provoking educational journey. The undergraduate programme in Sanskrit Language and Literature is distinguished by its strong focus on grammar and comprehension components while still allocating sufficient attention to literary discussions within the curriculum. Sanskrit education, recognised for its high employability potential, necessitates a practical integration of both grammatical and literary aspects. This programme operates on this premise, and the Self Learning Material is designed to reflect this balanced approach.

Rest assured, the university's student support services will be at your disposal throughout your academic journey, readily available to address any concerns or grievances you may encounter. We encourage you to reach out to us freely regarding any matter about your academic programme. It is our sincere wish that you achieve the utmost success.



Warm regards.
Dr. Jagathy Raj V. P. 01-01-2025

# CONTENTS


| | |
|---|---|
| **Block-1 उपोद्धातः** | **1** |
| Unit - 1 संस्कृतभाषाशास्त्रस्य उपोद्धातः | 2 |
| Unit - 2 भाषाशास्त्रस्य विकासस्तराः | 8 |
| Unit - 3 परम्परागतं तुलनात्मकभाषाशास्त्रम् | 14 |
| Unit - 4 आधुनिकभाषाशास्त्रम् | 19 |
| **Block-2 भाषायाः उत्पत्तिः** | **26** |
| Unit - 1 भाषायाः निर्वचनम् | 27 |
| Unit - 2 भाषायाः उत्पत्तिः | 32 |
| Unit - 3 भाषायाः उत्पत्तौ विद्यमानाः नियमाः | 38 |
| **Block-3 भाषाणां वर्गीकरणम्** | **44** |
| Unit - 1 भाषाणां वर्गीकरणम् | 45 |
| Unit - 2 इण्डो-यूरोप्यन् भाषापरिवारः | 54 |
| Unit - 3 इन्डोयूरोप्यन् भाषापरिवारस्य शाखाः | 62 |
| Unit - 4 इन्डोयूरोप्यन् भाषापरिवारस्य विशेषगुणाः | 72 |
| **Block-4 ध्वनिचर्चा** | **78** |
| Unit - 1 उच्चारणावयवाः | 79 |
| Unit - 2 शब्दोच्चारणम् | 85 |
| Unit - 3 संस्कृते अचः हलः च | 89 |
| Unit - 4 स्वरविचारः | 92 |
| **Block-5 ध्वनिनियमाः** | **98** |
| Unit -1 भाषापरिणतिः | 99 |
| Unit - 2 तालव्यनियमः | 104 |
| Unit - 3 ध्वनिपरिणामः | 108 |
| Unit - 4 सादृश्यविचारः | 113 |
| **Block-6 अर्थपरिणतिशास्त्रम्** | **117** |
| Unit - 1 अर्थपरिणतिशास्त्रम् | 118 |
| Unit - 2 अर्थपरिणतेः वर्गीकरणम्- 1 | 122 |
| Unit - 3 अर्थपरिणतेः वर्गीकरणम्- 2 | 127 |
| Unit - 4 अर्थपरिणतेः कारणानि | 132 |


SGOU

**Set-1 Model question paper** **137**
**Set-2 Model question paper** **140**

SGOU

BLOCK-1

# उपोद्घातः

SGOU

# Unit - 1

# संस्कृतभाषाशास्त्रस्य उपोद्घातः

## उद्देश्यानि (Learning Outcomes)

- भाषाशास्त्रमधिकृत्य सामान्यपरिज्ञानं लभते ।
- भाषाशास्त्रस्य लक्ष्यावगतिः ।
- भाषाशास्त्रस्य अन्यशास्त्रैः सह सम्बन्धस्य अवगतिः ।
- भाषायाः व्याप्तिमधिकृत्य ज्ञानम् प्राप्नोति ।

## प्राग्व्यपेक्षाः (Prerequisites)

संस्कृतवैयाकरणाः विभिन्नरूपेण भाषाशास्त्रस्य प्रतिपादनं न कृतवन्तः। ते व्याकरणेन साकमेव भाषाशास्त्रमपि संयोजितवन्तः। अतः भारतीयभाषाशास्त्रं सम्यक् अवगन्तुं व्याकरणे किञ्चित्परिज्ञानं अनिवार्यं भवति। तथा एव आधुनिकभाषाशास्त्रदृष्ट्या तत्रस्थान् विषयान् ज्ञातुम् आधुनिकभाषाशास्त्रे अभिरुचिः परिज्ञानं च अनिवार्यं भवति ।

## मुख्यपदानि (Keywords)

तुलनात्मकव्याकरणम्, भाषाशास्त्रम्, साम्प्रदायिकव्याकरणपठनम् , तुलनात्मकभाषाशास्त्रपठनम्, आङ्गलभाषा, उच्चारणं, वाक्यघटना, पदनिष्पत्तिः, मनश्शास्त्रपठनम्

## Discussion

एकस्याः भाषायाः अन्याभिः भाषाभिः सह सम्बन्धः कः इति निरीक्षणं कुर्मश्चेत् भाषाणां मध्ये सादृश्यं तथा वैजात्यञ्च द्रष्टुं शक्नुमः। भाषाणां तुलनात्मकं चरित्रपरञ्च अध्ययनमेव भाषाशास्त्रमित्युच्यते। यदा आङ्गलभाषया सह संस्कृतभाषायाः सम्बन्धः जातः तदा एव अस्मिन् विषये नूतनः पन्थाः उद्घाटितः। संस्कृतवैयाकरणास्तु व्याकरणेन साकं भाषाशास्त्रमपि योजितवन्तः। अस्मिन् विषये तेषां महद् योगदानं वर्तते। किन्तु भाषाशास्त्रज्ञाः अपि तदधिकृत्य अधिकं न जानन्ति।

### भाषाशास्त्रस्य स्वभावः सविशेषताश्च

भाषा संस्कारसंवेदनस्य आशयसंवेदनस्य च प्रधानः उपाधिः भवति। बाल्यादारभ्य द्वित्रिभाषाः मनुष्यः स्वांशीकरोति। भाषां विना मनुष्यजीवनमेव दुष्करं भवति। उक्तञ्च आचार्येण दण्डिना –

इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्

यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।

यदि शब्दरूपा ज्योतिः नास्ति तर्हि भुवनत्रयमपि कृत्स्नम् अन्धं तमः जायेत।

एकैकस्यापि पदस्य अर्थः तथा रूपञ्च स्तः। शब्दोच्चारणेन न केवलं शब्दस्य बहिःस्फुरणं वर्तते अपि तु चिन्ताविषयस्य क्रमः अपि तेन साकमागच्छति। एवञ्च शारीरिकं मानसिकञ्च व्यापारः तेन साकं वर्तेत इति कारणेनैव शब्दस्य पृथक्करणं न शक्यते। अत एव "वागर्थाविव संपृक्तौ" इत्याद्युच्यते।

किन्तु अस्माकं मनसि बहवः संशयाः उत्पद्यन्ते – भाषा कुतः उत्पद्यते? कथं विभिन्नाः जनाः विभिन्नभाषां वदन्ति ? कथं पदानामर्थभेदः भवति ? भाषां विना चिन्तयितुं शक्नुमः वा ? कृत्रिमा भाषा प्रवर्तेत किम् ? लोके वर्तमानाः व्यत्यस्ताः भाषाः कथमुत्पन्नाः इत्येवं बहुधा प्रश्नाः भवन्ति। एतादृशान् विषयान् तथा भाषायाः घटनां च सम्यक् निरीक्ष्य केचन सामान्याः नियमाः आविष्क्रियन्ते। एतादृशशास्त्रीयरीत्या भाषाणां पठनमेव भाषाशास्त्रमित्युच्यते। शास्त्रीयरीत्या भाषाणां पठनमेव भाषाशास्त्रम्। शास्त्रीयरीत्या निरीक्षितानि कार्याणि अनुभवेन निरीक्षितुं च शक्नुमः।

एतच्छास्त्रं तुलनात्मकभाषाशास्त्रं, तुलनात्मकव्याकरणं, भाषाशास्त्रम् इत्येवं विभिन्नैः नामभिः प्रथामलभत। भाषाशास्त्रसिद्धान्तान् कदापि अन्यथा व्याख्यातुं न शक्नुमः। भाषाशास्त्रं न केवलं भाषापठनमधिकृत्य वदति अपि तु तत्र विद्यमानं साहित्यं तथा तद्भाष्यमाणानां जनानां सांस्कारिकव्यत्यासाः च अनेन शास्त्रेण ज्ञाप्यन्ते।

पौराणिककाले भाषाशास्त्रं व्याकरणस्य भागः आसीत्। यदा मनुष्याणाम् अन्यभाषाभाषिभिः सह सम्पर्कः जातः मनुष्याः अन्यान्यभाषाः पठितुम् आरब्धवन्तः तदानीं एतासां भाषाणां सादृश्यवैजात्यादिषु तेषां श्रद्धा पतिता। तथा एव भाषाचरित्रमपि पठितुम् आरब्धवन्तः। ततः एव भाषाशास्त्रस्य प्रादुर्भावः अभवत्। यदा एकोनविंशतितमे शतके वैदेशिकाः भारतं प्राप्तवन्तः तदानीं एतस्य पठनस्य नूतनः पन्थाः आरब्धः। भाषाणां तुलनात्मकं तथा चरित्रपरञ्च पठनमेव तुलनात्मकभाषाशास्त्रपठनमित्युच्यते।

उच्चारणं, वाक्यघटना,पदनिष्पत्तिः इत्येवं बहुषु विषयेषु तुलनेन पठनमेव तुलनात्मकभाषापठने अस्ति। किन्तु चरित्रदृष्ट्या पठने तु एकस्याः एव भाषायाः विविधेषु कालेषु विकासं वर्धनञ्चाधिकृत्य निरीक्ष्यते।

## भाषाशास्त्रस्य व्याप्तिः (Scope of Linguistics)

भाषाशास्त्रं, भाषायाः अधः प्रदत्तेषु विषयेषु चरित्ररीत्या शास्त्रीयरीत्या च विशकलनं करोति –

1) मनुष्येषु सामान्यरीत्या वर्तमानानां विषयाणां पठनम्।

2) प्रत्येकभाषाविभागेषु वर्तमानानां सादृश्यं तथा व्यत्यासः च।

3) प्रत्येकभाषायाः विकासः, परिणतिः, देशभाषाभेदश्च।

भाषाशास्त्रे निरीक्षणरीतिः अपि अपूर्वा वर्तते। अन्यशास्त्राणि इव एतस्यापि शास्त्रस्य, पूर्वतनां इदानीन्तनाञ्च भाषां पठित्वा आविष्कृताः प्रत्येकनियमाः सन्ति। पूर्वविधिं विना परस्परं भाषायाः तुलनं कृत्वा एते नियमाः निर्मिताः प्रवर्तनीयाः च। गणितरसायनशास्त्रादीनि शास्त्राणि इव न भवति भाषाशास्त्रं यतो हि तानि इव यान्त्रिकप्रवृत्तिः न एतेषाम्। तथा एव दर्शनशास्त्राणि इव अनुभवपराण्यपि न। अतः एव भाषाशास्त्रं चरित्रशास्त्ररूपेण परिगण्यते।

तथा एव भाषाशास्त्रम् अन्येभ्यः शास्त्रेभ्यः पृथङ्ग तिष्ठति। किन्तु अन्येषु शास्त्रेषु स्वकीयप्रभां प्रसारयितुं तथा तेभ्यः प्रभां स्वीकर्तुं च एतच्छास्त्रं प्रभवति। उदाहरणं पश्यामश्चेत् नरवंशशास्त्रेण तथा सामूह्यशास्त्रेण एतस्य बन्धः कः इति न विशदीकर्तव्यः स्यात्। एवमेव शब्दस्य उच्चारणे श्रवणे च शरीरशास्त्रेण तथा भौतिकशास्त्रेण सम्बन्धः सर्वविदित एव। उच्चारणावयवानां घटना शरीरशास्त्रस्यापि विषयः एव। शब्दस्य उत्पत्तिः कथं सम्भवतीति भौतिकशास्त्रमपि अन्विषति। भाषाशास्त्रस्य अत्र किमर्थमन्वेषणा इति चेत् मनःशास्त्रसम्बन्धः अपि तत्र वर्तते एव। परिमितार्थे योजनं वा भवतु, विकसितमर्थं प्रति गमनं भवतु, चिन्ता तथा पदञ्च परस्परस्बद्धाः एव सर्वथा। अतः एकां भाषां सम्यक्

ज्ञातुमिच्छन्ति तर्हि तद्भाष्यमाणानां मानसिकव्यापारस्य प्रवृत्तिरपि अवश्यं ज्ञातव्या। अतः एव भाषाशास्त्रस्य मनःशास्त्रेण सह अभेदः सम्बन्धः वर्तत एव। तथा एव मनश्शास्त्रपठनं भाषाशास्त्रपठनाय उपकारकञ्च भवति। वाक्यरचनाप्रकारविचारः अर्थविपरिणामप्रकारविचारश्च मनःशास्त्रसम्बद्धे भवतः।

## भाषाशास्त्रपठनस्य लक्ष्यम् (Aim of Linguistics)

बहूनां भाषागणानां मध्ये उच्चारणे, पदेषु इत्येवमादीषु बहुषु विषयेषु कथं समानताः दृश्यन्ते, पौराणिककाले आधुनिककाले च भाषायां कीदृशाः भेदाः दृश्यन्ते, विभिन्नकालेषु एषः भेदः कथं प्रवृत्तः इत्येवं बहुषु विषयेषु पठनं क्रियतेऽस्मिन् भाषाशास्त्रे। तथा एव शब्दः कथमुत्पद्यते, वर्णसंयोगः कथं भवति, वर्णसंयोगेन कथं पदनिष्पत्तिः सम्भवति इत्येवं बहवः विषयाः एतच्छास्त्रेण विचिन्त्यन्ते। भाषायाः उत्पत्तिः, तस्यां परिवर्तनम्, तस्याः विकासः इत्येवं बहवः विषयाः अनेन शास्त्रेण चर्च्यन्ते।

## पुनरावृत्तिः (Recap)

- भाषां विना लोके किमपि ज्ञानं नैव साध्यम्।
- भाषा संस्कारसंवेदनस्य आशयसंवेदनस्य च प्रधानः उपाधिः भवति।
- भाषायाः चरित्रपरं तुलनात्मकञ्च शास्त्रीयं पठनमेव भाषाशास्त्रमित्युच्यते।
- एतच्छास्त्रं तुलनात्मकभाषाशास्त्रम्, तुलनात्मकं व्याकरणं, भाषाशास्त्रम् इत्येवं बहुभिः नामभिः ज्ञायते।
- पौराणिकभारते भाषाशास्त्रं व्याकरणस्य भागः आसीत्।
- तुलनात्मकपठने तु उच्चारणं , वाक्यघटना, पदनिष्पत्तिः इत्येवमादिषु बहुषु विषयेषु तुलना क्रियते।
- चरित्रदृष्ट्या पठने तु एकस्याः भाषायाः विभिन्नकालेषु विकासमधिकृत्य पठ्यते।
- भाषाशास्त्रमन्येभ्यः शास्त्रेभ्यः पृथक् न तिष्ठति।
- भाषाशास्त्रं मनःशास्त्रेण भौतिकशास्त्रेण शरीरशास्त्रेण च सम्बद्धमस्ति।
- भाषायाः उत्पत्तिः, विकासः, परिणतिः च अस्मिन् शास्त्रे चर्च्यन्ते।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. संस्कारसंवेदनस्य उपाधिः का ?
2. भाषायाः चरित्रपरं तुलनात्मकं च अध्ययनं किमुच्यते?
3. पौराणिककाले भाषाशास्त्रं कस्य भागः आसीत्?
4. भाषाशास्त्रस्य अन्यन्नाम किम्?
5. अर्थविपरिणामप्रकारविचारः केन शास्त्रेण सम्बद्धः अस्ति?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत
(Answer the following questions in one or two sentences)

1. भाषा कस्य उपाधिः?
2. भाषाशास्त्रं किमित्युच्यते ?
3. तुलनात्मकपठने केषु विषयेषु तुलना क्रियते?

## एकैकया खण्डिकया उत्तरं लिखत
(Answer the following questions in a paragraph)

1. भाषायाः प्राधान्यं विशदयत।
2. भाषाशास्त्रस्य व्याप्तिं विशदयत।
3. भाषाशास्त्रस्य लक्ष्यं निरूपयत।

## निर्दिष्टाभ्यासः (Assignments)

1. भाषाशास्त्रस्य का प्रसक्तिः इति विशदयत।
2. भाषाशास्त्रस्य लक्ष्यं व्याप्तिं च विशदयत।
3. भाषाशास्त्रस्य स्वभावं सविशेषताश्च विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. भाषा।
2. भाषाशास्त्रम्।
3. व्याकरणस्य।
4. तुलनात्मकभाषाशास्त्रम्, तुलनात्मकव्याकरणम्, भाषाशास्त्रम्।
5. मनःशास्त्रेण।

## सूचनाग्रन्थाः (References)


1. श्रीमन्नारायणमूर्तिः एम्, संस्कृतभाषाशास्त्रोपोद्घातः, डि.के. पब्लिकेशन्स्, दिल्ली, 1984.
2. टि. के रामचन्द्र अय्यर्, ए स्टुडन्टस् हान्टबुक्क् ओफ् कम्पारट्टीव् फिलोलजि, आर्.एस् वाध्यार् आन्ट् सन्स्, कल्पात्ति, पालक्काट्, 1987.
3. रोबिन्स् आर्. एच्. भाषाशास्त्रलघुचरित्रम्, रौट्लेट्ज्, 2013.
4. भाषाशास्त्रप्रवेशिनी, प्रोफ. आर्. एस्. वेङ्कटरामशास्त्री, कुप्पुस्वामिशास्त्रि रिसेर्च् इन्स्टिट्यूट्, चेन्नै 1996.

# Unit - 2

# भाषाशास्त्रस्य विकासस्तराः

## उद्देश्यानि (Learning Outcomes)

- भाषाशास्त्रस्य विकासमधिकृत्य सामान्यपरिज्ञानं लभत्।
- भाषाशास्त्रस्य विभिन्नान् विभागान् अवगच्छति।
- भाषाशास्त्रस्य साम्प्रदायिकपठनमधिकृत्य ज्ञानम्।

## प्राग्व्यपेक्षाः (Prerequisites)

भाषाशास्त्रं नाम किमिति परिज्ञानमनिवार्यं भवति। कदा अस्य शास्त्रस्य उत्पत्तिरिति ज्ञातव्यम्। तुलनात्मकपठने किं किमुपयुज्यते इति ज्ञातव्यम्। भाषायाः विकाससोपानानि कानि इत्यादिकानि अवश्यं ज्ञेयानि भवन्ति।

## मुख्यपदानि (Keywords)

साम्प्रदायिकव्याकरणपठनम्, तुलनात्मकभाषाशास्त्रपठनम्, आधुनिकभाषाशास्त्रपठनं, वाक्यघटनायाः, कालभेदादीनाम्, अर्थभेदस्य , पाश्चात्यव्याकरणम्,

## Discussion

पौराणिककालेऽपि भाषाशास्त्रस्य पठनमवश्यं प्रावर्तत। किन्तु केवलमेकस्याः भाषायाः एव निरीक्षणं तत्राभवत् । यतो हि एतच्छास्त्रं व्याकरणेन सम्बद्धमासीत्। उदाहरणार्थं संस्कृतव्याकरणं स्वीकुर्मश्चेदपि, तस्याः भाषायाः आगमादेशसमासकृत्तद्धितादयः कथं प्रवर्तन्ते इति, तथा एव तत्र आर्थिकनियमाः कथं प्रावर्तन्त इत्येव च विचारिताः। किन्तु एतादृशानां सर्वासामपि भाषाणां व्याकरणस्य

तथा आर्थिकचिन्तायाश्च अन्यभाषाभाषिभिः सह सम्पर्के जाते सति नूतनः प्रभावः समुद्भूतः। तदानीं अस्य शास्त्रस्य साम्प्रदायिक - तुलनात्मक- आधुनिकभाषाशास्त्रादिभेदाः समुद्भूताः।

## भाषाशास्त्रस्य विकासस्तराः

यदा विदेशभाषायाः संस्कृतभाषया सह सम्पर्कः जातः, ततः आरभ्य एतस्य शास्त्रस्य महान् विकासः आरब्धः। भाषाशास्त्रस्य विकासस्तराः त्रिधा विभक्तुं शक्यते। साम्प्रदायिकव्याकरणपठनम्, तुलनात्मभाषापठनम्, आधुनिकभाषाशास्त्रपठनम् चेति। एते स्तराः एतस्य शास्त्रस्य विभिन्नानि विकाससोपानानि इति वक्तुं शक्यन्ते।

### 1. साम्प्रदायिकव्याकरणपठनम्

प्राचीनकाले व्याकरणसम्प्रदायानुसारं भाषाशास्त्रमपि व्याकरणेन साकं पठितवन्तः। वाक्यघटनायाः, कालभेदादीनाम्, अर्थभेदस्य च आधारेण व्याकरणपद्धतिः प्रवृत्ता। भारतीयव्याकरणपद्धतिः एव प्राचीनतमा स्वतन्त्रा च। अन्यानि व्याकरणानि अपेक्ष्य अत्यधिकं शास्त्रीयं भवति पाणिनीयव्याकरणम्। पाणिनिः पूर्ववर्तिनः बहून् आचार्यान् अनुस्मरति। ततः एव पाणिनेः पूर्वं समुत्पन्ना सा परम्परा इति अवगन्तुं शक्नुमः। न केवलं भाषास्वरूपम् अपि तु वैदिकमन्त्राणां उच्चारणमपि संरक्ष्यतेऽस्मिन् व्याकरणे। अतः स्वनशास्त्रदृष्ट्या अपि एतस्य व्याकरणस्य वैशिष्ट्यमस्ति। एतेनैव कारणेन पाश्चात्यव्याकरणमपेक्ष्य स्वनशास्त्रविषये भारतीयानां महद् योगदानं वर्तते। पदानां विश्लेषणेन पठनेऽपि भारतीयव्याकरणम् अन्यानि व्याकरणानि अतिशेते।

### 2. तुलनात्मकभाषाशास्त्रपठनम्

भाषायाः विकासमधिकृत्य पठने अयं मार्गः उपयुज्यते। विविधकालेषु भाषाः विभिन्नरूपेण सापेक्षाः भवन्ति। तासां मेलनेन पदानां परस्परं मेलनं भवति। तथा च प्रत्येकासु भाषासु अन्यभाषाप्रभावः उत्पद्यते। एषः प्रभावः विभिन्नसमयेषु विभिन्नरूपेण प्रवर्तते। एवञ्च भाषायाः परस्परबन्धमधिकृत्य अनुमानसिद्धान्ताः क्रियन्ते। एते सिद्धान्ताः प्रतिसमयं नूतनप्रमाणानुसारं परिष्क्रियन्ते च।

भाषाणां बन्धः तासां सादृश्यमाधारीकृत्य निर्णीयते। सादृश्यञ्च द्विधा भवति- पदसादृश्यं तथा व्याकरणसादृश्यञ्च। उदाहरणार्थं वदामश्चेत् जर्मन्भाषायाः आङ्गलेयस्य च तुलने सति पदेषु बहुधा सादृश्यं दृश्यते। उदाहरणं पश्यत-

| <u>**आङ्गलेयभाषा**</u> | <u>**जर्मन्भाषा**</u> |
|---|---|
| Brother | Bruder |
| Can | Kann |
| Mother | Mutter |

पदबन्धेन साकं व्याकरणबन्धोऽपि द्रष्टुं शक्नुमः। जर्मन् – आङ्गलेयभाषयोर्मध्ये व्याकरणेऽपि सादृश्यं दृश्यते। विभिन्नकाले एतस्य भेदोऽपि द्रष्टुं शक्नुमः।

**3. आधुनिकभाषाशास्त्रम्**

स्विस् शास्त्रज्ञः फर्डिनन्ड्. डि. सोस्यूर् एव आधुनिकभाषाशास्त्रस्य आविष्कर्ता भवति। आनन्तरिकभाषाशास्त्रज्ञानां प्रेरणादायकः एषः एव आसीत्। सम्भाषणभाषायाः लेखनभाषायाश्च प्राधान्यविषये पूर्वतनेभ्यः वैयाकरणेभ्यः तुलनात्मकभाषाशास्त्रज्ञेभ्यश्च एतेषां मतभेदः वर्तते। वैयाकरणानां तथा तुलनात्मकभाषाशास्त्रज्ञानाञ्च मते लेखनभाषा एव आधारभूता भाषा। सा एव शुद्धा प्रधानभूता चेति ते विश्वसन्ति।

तदपि न, पारम्परिकवैयाकरणानां मते भाषा शुद्धा भूत्वा संरक्षणीया इति विषये निष्ठा वर्तते। किन्तु अस्मिन् विषये आधुनिकभाषाशास्त्रज्ञानां मतं भिन्नमस्ति। ते सम्भाषणभाषा एव प्रधानमिति वदन्ति। लेखनं तु सम्भाषणभाषायाः संरक्षणार्थं विद्यमाना उपाधिः इति ते अभिप्रयन्ति। भाषणं तु लेखनात्पूर्वमेव आरब्धमित्यतः तदेव अधिकं प्रधानमिति तेषां मतम्।

**पुनरावृत्तिः (Recap)**

- यदा विदेशभाषया सह सम्पर्कः जातः तदा भाषाशास्त्रस्य विकासः समद्भूतः।
- भाषाशास्त्रस्य विकासस्तरे साम्प्रदायिकव्याकरणपठनम्, तुलनात्मकभाषापठनम्, आधुनिकभाषाशास्त्रम् इति विकाससोपानानि वर्तन्ते।
- वाक्यघटनायाः, कालभेदादीनाम्, अर्थभेदस्य च आधारेण व्याकरणपद्धतिः प्रवृत्ता।
- पाश्चात्यव्याकरणमपेक्ष्य स्वनशास्त्रविषये भारतीयानां महत् योगदानं वर्तते।

- पदविश्लेषणरीत्या पठनेऽपि भारतीयव्याकरणं अन्यानि व्याकरणानि अतिशेते।
- विभिन्नभाषाभाषिणां मेलनेन प्रत्येकासु भाषासु अन्यभाषाप्रभावः दृश्यते।
- तुलनात्मकपठने अनुमानसिद्धान्ताः रूपीक्रियन्ते तथा प्रतिसमयं परिष्क्रियन्ते च।
- भाषासादृश्यं द्विधा भवति। पदसादृश्यं, व्याकरणसादृश्यञ्च।
- स्विस् शास्त्रज्ञः फेर्डिनन्ड्. डि. सोस्यूर् एव आधुनिकभाषाशास्त्रस्य आविष्कर्ता भवति।
- वैयाकरणानां तुलनात्मकभाषाशास्त्रज्ञानां च मते लेखनभाषा एव आधारभूता भाषा।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. भाषाशास्त्रस्य विकासस्तराः कतिविधाः?
2. प्राचीनकाले केन साकं भाषाशास्त्रं पठितवन्तः?
3. अन्यानि व्याकरणानि अपेक्ष्य शास्त्रीयं व्याकरणं किम्?
4. स्वनशास्त्रदृष्ट्या विशिष्टं व्याकरणं किम्?
5. भाषाणां सादृश्यं कतिविधम्?
6. आधुनिकभाषाशास्त्रस्य आविष्कर्ता कः?
7. वैयाकरणानां मते आधारभूता भाषारीतिः का?
8. भाषाणां बन्धः तासां सादृश्यमाधारीकृत्य कथं निर्णीयते?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत
## (Answer the following questions in one or two sentences)

1. भाषाशास्त्रस्य विकासः केन प्रकारेण समद्भूतः?

## एकैकया खण्डिकया उत्तरं लिखत
(Answer the following questions in a paragraph)

1. साम्प्रदायिकव्याकरणमधिकृत्य विशदयत।
2. आधुनिकभाषाशास्त्रमधिकृत्य विशदयत।
3. तुलनात्मकभाषाशास्त्रमधिकृत्य निरूपयत।

## निर्दिष्टाभ्यासः (Assignments)

1. भाषाशास्त्रस्य विकासस्तरान् विशदयत।
2. साम्प्रदायिकव्याकरणस्य व्याप्तिं विशदयत।
3. भाषाशास्त्रस्य विकासे सोपानत्रयं विशदयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. त्रिविधाः।
2. व्याकरणेन।
3. पाणिनीयव्याकरणम्।
4. पाणिनीयव्याकरणम्।
5. द्विविधम्।
6. फर्डिनन्ड्. डि. सोस्यूर्।
7. लेखनभाषा।
8. पदसादृश्यं, व्याकरणसादृश्यञ्च।

## सूचनाग्रन्थाः (References)


1. श्रीमन्नारायणमूर्तिः एम् , संस्कृतभाषाशास्त्रोपोद्घातः, डि.के. पब्लिकेशन्स्, दिल्ली, 1984.
2. टि. के रामचन्द्र अय्यर्, ए स्टुडन्टस् हान्टबुक्क् ओफ् कम्पारट्टीव् फिलोलजि, आर्.एस् वाध्यार् आन्ट् सन्स् , कल्पात्ति, पालक्काट्, 1987.
3. रोबिन्स् आर्. एच्. भाषाशास्त्रलघुचरित्रम् , रौट्लेट्ज्, 2013.
4. भाषाशास्त्रप्रवेशिनी, प्रोफ. आर्. एस्. वेङ्कटरामशास्त्री, कुप्पुस्वामिशास्त्रि रिसेर्च् इन्स्टिट्यूट्, चेन्नै 1996.

# Unit - 3
# परम्परागतं तुलनात्मकभाषाशास्त्रम्

## उद्देश्यानि (Learning Outcomes)

- एकस्याः भाषायाः व्याकरणपठनं कथं प्रवर्तते इति परिज्ञानं लभते।
- विभिन्नभाषायाः पदानां परस्परतुलनं जानाति।
- भाषायाः समानगोत्रत्वं कथमित्यवगतिः।

## प्राग्व्यपेक्षाः (Pre requisites)

तुलनात्मकभाषाशास्त्रं, तुलनात्मकव्याकरणं, भाषाशास्त्रम् इत्येवं विभिन्नैः नामभिः भाषापरिज्ञानम्, एकस्याः भाषायाः व्याकरणपरिज्ञानम् इति। पदानां मिथः बन्धः भाषाभिः सह बन्धः पद-पदार्थयोः बन्धः, भाषायां कालानुसारमाराताः भेदाः च संस्कृतभाषाशास्त्रे अन्तर्भवति।

## मुख्यपदानि (Keywords)

परम्परागतभाषापठनम्, तुलनात्मकभाषापठनम् , आन्तरिकघटना, वाक्यघटना, कालभेदाः, स्वनशास्त्रम्

## Discussion

एकस्याः भाषायाः व्याकरणनियमान् ज्ञात्वा पठनं, भाषाणां परस्परं तुलनं कृत्वा पठनमित्येवं भाषापठनं बहुधा प्रावर्तत। परम्परागतभाषापठने तु विभिन्नकालेषु भाषायाः कीदृशः भेदः इति विषये अधिका चिन्ता न क्रियते अपि तु लिखितां भाषां शुद्धां मत्वा तस्याः सम्यक् प्रयोगः कथं करणीयः इत्येतस्मिन् विषये चिन्ता क्रियते। एकस्याः भाषायाः आन्तरिकघटनायां तस्य चिन्ता प्रवर्तते। अनेकेषां भाषाणां तुलनं कृत्वा पठनमेव तुलनात्मकभाषापठने क्रियते। विविधभाषाणां पदेषु तथा व्याकरणे समानतां परिशील्य तासां पूर्विकभाषाणां पुनराविष्करणं क्रियते अनया पद्धत्या।

## भाषाशास्त्रविभागाः

भाषा विभिन्नेषु कालेषु विभिन्नरीत्या पठिता। प्राचीनकाले तु शुद्धभाषायाः प्रयोगः स्वर्गप्राप्तिरूपं फलं प्रददाति इत्येवं संस्कृतवैयाकरणानां विश्वासः आसीत्। वाक्यघटना, कालभेदाः, अर्थभेदाश्च व्याकरणस्य विषयाः आसन्। भारतीयव्याकरणपद्धतिः प्राचीनतमा समग्रा च। अन्यानि व्याकरणानि अपेक्ष्य अत्यधिकं शास्त्रीयं भवति पाणिनीयव्याकरणम्। न केवलं भाषास्वरूपस्य संरक्षणम् अपि तु वैदिकमन्त्राणां उच्चारणमपि अर्थविधायकत्वात् संरक्ष्यतेऽस्मिन् व्याकरणे। अतः स्वनशास्त्रदृष्ट्या अपि एतस्य संस्कृतव्याकरणस्य महद्योगदानमस्ति। स्वनशास्त्रविषये प्राचीनता एतेन व्याकरणेन संरक्षिता इति अस्य अधिकं वैशिष्ट्यमस्ति। भाषापठनस्य रीतिद्वयं वर्तते। परम्परागतभाषापठनं तुलनात्मकभाषापठनञ्च।

## परम्परागतभाषापठनम्

परम्परागतभाषापठने तु एकस्याः एव भाषायाः स्वभावः पठ्यते। तस्याः भाषायाः व्याकरणं तदनुसारिप्रयोगाश्च अत्र पठ्यन्ते। सा भाषा कथं प्रयोक्तव्या, तस्याः भाषायाः लेखने तथा प्रयोगे अनुसर्तव्याः नियमाः के इत्येते एव परम्परागतभाषापठनस्य विषयाः भवन्ति। अर्थात् एका भाषा कथं प्रयोक्तव्या इति विषयः एव अत्र मुख्यतया चर्च्यते। तस्य विविधप्रयोगेषु निरीक्षणं कृत्वा पठनं तु तस्य विषयः न। एकस्याः भाषायाः आन्तरिकघटनां विशदीकरोति परम्परागतव्याकरणम्। उदाहरणं पश्यामश्चेत् संस्कृतव्याकरणस्य इदानीमुपयुज्यमानः ग्रन्थः भवति अष्टाध्यायी। अस्मिन् ग्रन्थे संस्कृतभाषाप्रयोगेषु विद्यमानानां नियमानां संग्रहः एव उच्यते। एवमेव प्रत्येकं भाषाव्याकरणं प्रवर्तते।

## तुलनात्मकभाषापठनम्

अनेकेषां भाषाणां तुलनं कृत्वा पठनमेव तुलनात्मकभाषापठनमित्युच्यते। भाषाणां तुलनं कृत्वा साजात्यवैजात्ययोः निरीक्षणं क्रियते अस्मिन् पठने। एतादृशपठनेन भाषायाः चरित्रपरः बन्धः कः परिशोधयति। समानपदानि दृष्ट्वा अथवा व्याकरणविषयेषु समानतां दृष्ट्वा तासां भाषाणां पूर्विकभाषायाः अन्वेषणे एषः मार्गः उपयुज्यते। अथवा पूर्विकभाषायाः पुनराविष्कारे एषः मार्गः उपयुज्यते। तुलनात्मकपठने भाषाणां परस्परबन्धः कः इति निरीक्षणमेव अधिकतया विषयः। शब्दे अर्थे पदे च भाषाणां सम्बन्धमवगन्तुं तुलनात्मकपठनमनिवार्यं भवति। चरित्ररीत्या एवं भाषाणां तुलनं कृत्वा तेषां वर्गीकरणे एषः मार्गः एव प्रधानः भवति।

## पुनरावृत्तिः (Recap)

- परम्परागतभाषापठनं तुलनात्मकभाषापठनम् इति भाषापठनं द्विधा अवर्तत।
- एका भाषा कथं प्रयोक्तव्या, तस्याः भाषायाः लेखने प्रयोगे च अनुसर्तव्याः नियमाः के इत्येव परम्परागतभाषापठनस्य विषयः।
- परम्परागतभाषापठनम् एकस्याः भाषायाः आन्तरिकघटनां विशदीकरोति।
- अनेकेषां भाषाणां तुलनं कृत्वा पठनमेव तुलनात्मकभाषापठनमित्युच्यते।
- विभिन्नभाषासु विद्यमानानां समानपदानां तथा समानव्याकरणस्य च परिशीलनेन तासां भाषाणां पूर्विकभाषां पुनराविष्करोति अयं मार्गः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. केन मार्गेण पूर्विकभाषा पुनराविष्क्रियते ?
2. भाषापठनस्य रीतयः कतिविधः?
3. एका एव भाषा पठ्यते चेत् कः मार्गः अनुसर्तव्यः?
4. संस्कृतव्याकरणम् इदानीम् अधिकतया कं ग्रन्थम् आधारीकृत्य पठ्यते?
5. परम्परागतभाषापठने का शुद्धा भवेदिति चिन्त्यते ?
6. परम्परागतभाषापठनम् एकस्याः भाषायाः .........विशदीकरोति।(रिक्तं पूरयत)

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत
## (Answer the following questions in one or two sentences)

1. तुलनात्मकभाषापठनं नाम किम् ?
2. परम्परागतभाषापठनस्य विषयाः के ?

## एकैकया खण्डिकया उत्तरं लिखत
**(Answer the following questions in a paragraph)**

1. परम्परागतभाषापठनमधिकृत्य विशदयत।
2. तुलनात्मभाषापठनमधिकृत्य विशदयत।

## निर्दिष्टाभ्यासः (Assignments)

1. भाषापठनस्य मार्गद्वयं विशदयत।
2. परम्परागतभाषापठनं तुलनात्मपठनात् कथं भिद्यते इति विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. तुलनात्मकभाषापठनेन।
2. द्विविधः।
3. परम्परागतभाषापठनम्।
4. अष्टाध्यायीम्।
5. लेखनभाषा।
6. आन्तरिकघटनां

## सूचनाग्रन्थाः (References)


1. श्रीमन्नारायणमूर्तिः एम्, संस्कृतभाषाशास्त्रोपोद्घातः, डि.के. पब्लिकेशन्स्, दिल्ली, 1984.
2. टि. के रामचन्द्र अय्यर्, ए स्टुडन्टस् हान्टबुक्क् ओफ् कम्पारट्टीव् फिलोलजि, आर्.एस् वाध्यार् आन्ट् सन्स्, कल्पात्ति, पालक्काट्, 1987.
3. रोबिन्स् आर्. एच्. भाषाशास्त्रलघुचरित्रम्, रौट्लेट्ज्, 2013.

4. भाषाशास्त्रप्रवेशिनी, प्रोफ. आर्. एस्. वेङ्कटरामशास्त्री, कुप्पुस्वामिशास्त्रि रिसेर्च् इन्स्टिट्यूट्, चेन्नै 1996.

SGOU

# Unit - 4

# आधुनिकभाषाशास्त्रम्

## उद्देश्यानि (Learning Outcomes)

- आधुनिकभाषाशास्त्रस्य दृष्टिः कथमिति जानाति।
- भाषाशास्त्रस्य विभिन्नान् विभागान् अवगच्छति।
- चरित्रपरभाषापठनं विवरणात्मकपठनञ्चाधिकृत्य ज्ञानम् आर्जयति।

## प्राग्व्यपेक्षाः (Prerequisites)

भाषाशास्त्रप्रकरणे आधुनिकपौराणिकपठनयोः को भेदः इति ज्ञातव्यं भवति। भारतीयभाषापठनस्य तथा वैदेशिकभाषापठनस्य च मध्ये को भेदः इत्यपि ज्ञातव्यं भवति। तुलनात्मकपठनं कथं प्रवर्तते इति भवति। पदानामर्थनिष्पत्तिं अर्थविपरिणां अर्थविपरिणामस्य कारणादिकं चावश्यं ज्ञातव्यानि।

## मुख्यपदानि (Keywords)

घटनावादः, आधुनिकभाषाशास्त्रं, वर्णोत्पत्तिविपरिणामप्रकारविचारः, पदनिष्पत्तिप्रकारविचारः, वाक्यरचनाप्रकारविचारः, अर्थविपरिणामप्रकारविचारः, चरित्रपरभाषापठनम्, विवरणात्मकभाषापठनम्

## Discussion

घटनावादस्य उपस्थापकः स्विस् शास्त्रज्ञः फर्डिनन्ड्. डि. सोस्यूर् एव आधुनिकभाषाशास्त्रस्य उपस्थापकः। वर्णोत्पत्तिविपरिणामप्रकारविचारः, पदनिष्पत्तिप्रकारविचारः, वाक्यरचनाप्रकारविचारः, अर्थविपरिणामप्रकारविचारः इत्येवं भाषाशास्त्रस्य चत्वारः विभागाः सन्ति। चरित्रपरभाषापठनं विवरणात्मकभाषापठनमित्येवमपि अन्यथा पठनं क्रियते। एकामेव भाषामाधारीकृत्य यदा पठ्यते तदा एव चरित्रपररीतिः उपयुज्यते। यदा न्यूनातिन्यूनं भाषाद्वयमधिकृत्य पठ्यते तदा एव तुलनात्मकरीतेः प्रयोगः।

## भाषाशास्त्रस्य आधुनिकता

स्विस् शास्त्रज्ञः फर्डिनन्ड्. डि. सोस्यूर् एव आधुनिकभाषाशास्त्रस्य आविष्कर्ता भवति। घटनावादः (structuralism) एतेन उपस्थापितः। एतस्य मते भाषा सामूहिकप्रतिभासः भवति। संज्ञाशास्त्रं, चिह्नशास्त्रम् इत्येवं रूपेण तस्य सिद्धान्ताः उक्ताः। चिह्नप्रक्रियां तथा अर्थं अथवा आशयमधिकृत्य क्रियमाणं व्यवस्थापितं पठनं भवति चिह्नशास्त्रम्। चिह्नं नाम , तस्य व्याख्यातुः निष्कृष्टरूपेण अथवा अन्यथा दीयमानं यत्किमपि वस्तु भवति।

## भाषाशास्त्रविभागाः

भाषाशास्त्रपठनप्रक्रियायां शब्दे, उच्चारणे, पदनिष्पत्तौ वाक्यरचनायां अर्थे च पण्डितानां श्रद्धा पतिता। तदानीं भाषाशास्त्रं चतुर्धा विभक्तमस्ति। a) वर्णोत्पत्तिविपरिणामप्रकारविचारः, b) पदनिष्पत्तिप्रकारविचारः, c) वाक्यरचनाप्रकारविचारः, d ) अर्थविपरिणामप्रकारविचारः इति।

### a) वर्णोत्पत्तिविपरिणामप्रकारविचारः

शब्दानामुत्पत्तिं विकासं तथा तेषां चरित्रञ्चाधिकृत्य पठ्यतेऽस्मिन् शास्त्रे। कण्ठताल्वादीनाम् उच्चारणस्थानानां पठनमपि अस्य शास्त्रस्य विषयः। शब्दानामुत्पत्तिः, विपरिणामः, शब्दोत्पत्तिस्थानानां घटना इत्येवं शब्दसम्बद्धानां सर्वेषां विषयाणां पठनम् अस्मिन् शास्त्रे क्रियते। उच्चारणेन शब्दविपरिणामः, शब्दविपरिणामस्य विभिन्नाः नियमाः इत्येवं बहवः विषयाः अस्मिन् शास्त्रे चर्च्यन्ते।

### b) पदनिष्पत्तिप्रकारविचारः

पदानां निष्पत्तिः, प्रकृतिप्रत्ययादिभिः पदसंरचना इत्यादयः अस्मिन् शास्त्रे पठ्यन्ते। प्रातिपदिकेभ्यः प्रत्यययोजनेन नामरूपाणां निष्पत्तिः, धातुना सह प्रत्ययं योजयित्वा क्रियारूपाणां निष्पत्तिः, समस्तपदानां निष्पत्तिप्रकारः कृदन्तानां निष्पत्तिः आगमादेशानां प्रवृत्तिः इत्येतत्सर्वं अस्य शास्त्रस्य विषयः।

### c) वाक्यरचनाप्रकारविचारः

वाक्ये पदानि कथं क्रमीकृतानि तथा चिन्तासंप्रेषणे पदानां परस्परबन्धः कः इत्यादयः विषयाः अस्मिन् शास्त्रे पठ्यन्ते। वाक्यमेव भाषायाः मूलम्। अतः तस्य संरचना अतीव प्राधान्यमर्हति।

### d) अर्थविपरिणामप्रकारविचारः

अर्थस्य विपरिणामः कथं सम्भवति इति अस्मिन् शास्त्रे पठ्यते। पूर्वतनाः अर्थाः कथं पदेन सम्बद्धाः अभवन् इति अत्र विचिन्त्यते। उदाहरणं वदामश्चेत् पूर्वम् असुरः इति पदम् उत्तमे इत्यर्थे उपयुक्तमासीत्।

सौराष्ट्रियानां  ईश्वरः अहुर  इति नाम्ना प्रसिद्धः आसीत्। किन्तु ऋग्वेदे इन्द्रवरुणयोः गुणत्वेन तथा अधमे अर्थे च इदं पदमुपयुक्तं दृश्यते। कदाचित् 'अ' इति योजनेन नञर्थानुभवेन सुर इति पदस्य विपरीतभावप्रतीत्या अर्थस्य परिवर्तनं सम्भूतमिति अनुमीयते।

उपर्युक्तेषु विभागेषु पदनिष्पत्तेः वाक्यरचनाप्रकारस्य च बहुषु विषयेषु समानतया केचन भाषाशास्त्रज्ञाः तद्वयमपि समानमिति परिगणयन्ति। तेषां मते विभिन्नविभागरूपेण तेषां परिगणनस्य आवश्यकता नास्ति। केचन निरुक्तमपि भाषाशास्त्रविभागः इति वदन्ति। किन्तु सर्वेऽपि एतन्नाङ्गीकुर्वन्ति। निरुक्तं तु पदनिष्पत्तौ अर्थचिन्तायाम् उच्चारणादिविषयेषु च विभिन्नेषु सन्दर्भेषु  प्रयोजकं भवति। अतः प्रयुक्तपदनिष्पत्तिशास्त्ररूपेण तत्परिगणयितुं शक्नुमः।

## चरित्रपरभाषापठनं विवरणात्मकभाषापठनञ्च

सोस्यूर् एव एतादृशपठनस्य उपस्थापकः भवति। कालानुसारं एकस्याः भाषायाः चरित्रपरस्य विकासस्य पठनं प्रथमे चरित्रपरभाषापठने  क्रियते। उदाहरणार्थं संस्कृतभाषां स्वीकुर्मश्चेत् वैदिककालादारभ्य अद्यावधि संस्कृते यत् परिवर्तनं दृश्यते तत् पठ्यते, अथवा परिमितं कालं स्वीकृत्यापि एतत् पठनं क्रियते।

विवरणात्मकपठने तु एकस्मिन् काले भाषायाः अवस्था कीदृशी इति पठ्यते। एकोननवतितमे शतके भाषाशास्त्रेण तु चरित्रपरे पठने एव अधिका श्रद्धा विहिता। अधुना भाष्यमाणानां भाषाणां पठने तु विवरणात्मकपठनमेव मुख्यतया क्रियते। आधुनिकभाषाशास्त्रज्ञानां मते चरित्रपरं पठनं तु भाषायाः अवस्थापठने अप्रधानम् भवति। एतादृशपठनं न केवलं भाष्यमाणभाषापठने प्रवर्तकं भवति अपि तु इदानीमवर्तमानानां भाषाणां पठने च सहायकः भवति। किन्तु तादृशपठनार्थं तस्यां भाषायां विद्यमानानां लिखितग्रन्थानां लेखनानां वा उपलब्धिः भवेत्। इदानीमवर्तमानानां भाषाणां पठनं, वर्तमानानां पठनमपेक्ष्य सरलं भवति। यतो हि भाष्यमाणेषु प्रयुज्य केषाञ्चन प्रयोगाणां साधुतां परिशोधयितुं वयं न शक्नुमः।शीघ्रतया भाषाप्रयोगे व्यतियानं वर्तते। कदाचित् परस्परविरुद्धेऽर्थेऽपि समानपदं दृश्यते।

एकेन उदाहरणेन एतद् परिशोधयामः - वैदिकसंस्कृते अकारान्तशब्दानां तृतीया बहुवचने भिस् तथा ऐस् प्रत्ययौ भवतः, यथा पूर्वेभिः, नवीनैः इत्यादिप्रयोगाः। तथा एव प्रथमाबहुवचने सोमाः,  सप्तहस्तासः इत्येवं रूपाणि भवन्ति। किन्तु लौकिकसंस्कृते नवीनैः, सोमाः इत्येवमेव रूपाणि भवन्ति। अत्र विवरणात्मकपठने तु अधुनातनभाषायाः एव पठनं क्रियते। किन्तु चरित्रपरे पठने तु वैदिकभाषायाः आरभ्य

इदानीं वर्तमानायाः भाषायाः कालपर्यन्तं तृतीयाविभक्तौ अथवा प्रथमाविभक्तौ कथं भेदः समपद्यत इत्यन्विष्य भाषायाः सरलीकरणार्थं केचन प्रत्ययाः त्यक्ताः इत्येवं निरूप्यते।

### भाषायाः विवरणात्मकपठने चरित्रपररीतिः तथा तुलनात्मकरीतिः

विवरणात्मकपठनेन प्राप्तानि चरित्रपराणि कार्याणि द्विधा विभक्तुं शक्यम्- आलेखितचरित्रम्, तत्पूर्वतनचरित्रञ्च। भाषायाः चरित्रं तत्तद्भाषायाम् आलेखितेभ्यः ग्रन्थेभ्यः अथवा लेखनेभ्यः एव ज्ञातुं शक्नुमः। किन्तु लिखितात् पूर्वतनं कालमधिकृत्य किमपि ज्ञातुं न शक्नुमः। यतो हि लेखनमारभ्य अधिकः कालः न जातः। अतः लोकस्य कस्मिन्नपि पार्श्वे स्थिता आलेखनरेखा अधिका पुरातनी न। किन्तु लेखनचरित्रात् पूर्वमेव अस्माकं पूर्वजाः भाषायाः उपयोगं कृतवन्तः इति विश्वसितुं बहूनि कारणानि सन्ति। लिखितचरित्रात् पूर्वतनानि चरित्रपराणि कार्याणि पूर्वतनचरित्रे अन्तर्भवन्ति। तन्त्रस्य (Technical support) साहाय्येनैव एतानि कार्याणि अवगन्तुं शक्नुमः।

भाषायाः विवरणात्मकपठने चरित्रपररीतिः तथा तुलनात्मकरीतिः इति रीतिद्वयमुपयुज्यते। एकामेव भाषामाधारीकृत्य यदा पठ्यते तदा एव चरित्रपररीतिः उपयुज्यते। यदा न्यूनातिन्यूनं भाषाद्वयमधिकृत्य पठ्यते तदा एव तुलनात्मकरीतेः प्रयोगः।

या कापि भाषा भवतु, तस्याः लिखितचरित्रस्य पुनराविष्करणाय चरित्रपठनरीतिमुपयोक्तुं शक्यते। यत्र लिखवतचरित्रं नास्ति, तत्र आन्तरिकपुनरुद्धारणम् (Internal reconstruction) उपयोक्तुं शक्यते। आन्तरिकपुनरुद्धारणं नाम भाषायामेव आन्तरिकानि कार्याणि द्रष्टुं शक्नुमः। ततः अनुमित्या पूर्वतनानां विषयाणामनुमितिः क्रियते। उदाहरणार्थं पश्यामश्चेत् ऋग्वेदस्य विभिन्नेषु मण्डलेषु द्वन्द्वसमासस्य उदाहरणानि दृष्ट्वा द्वन्द्वसमासस्य चरित्रमनुमातुं शक्नुमः।

तुलनात्मकपठनमपि एकस्याः भाषायाः पूर्वतनचरित्रं ज्ञातुमुपकारकं भवति। अस्मिन् विषये आन्तरिकपुनरुद्धारणप्रक्रियामपेक्ष्य एतस्य अधिकं महत्वं वर्तते। भाषाद्वयस्य तदधिकानां वा भाषाणां तुलनं यदि क्रियते तर्हि तासामन्योन्यसादृश्ये वैजात्यं द्रष्टुं शक्नुमः। एतासां भाषाणां मूलभूतां पूर्विकभाषां पुनरन्वेष्टुं एषः उपायः सहायकः भवति। लिखितग्रन्थानाम् अभावे एतादृशपरोक्षमार्गाः एव एतस्मिन् विषये उपयोक्तव्याः भवन्ति। कदाचित् लिखितग्रन्थेभ्यः अपि सम्पूर्णं ज्ञातुं न शक्नुमः। उदाहरणं पश्यामश्चेत् रोमन् भाषायाम् उपयुज्यमानानि सर्वाण्यपि पदानि तेषां लिखितग्रन्थेषु द्रष्टुं न शक्नुमः। लाटिन्भाषायां विद्यमानानि

बहूनि पदानि रोमन्भाषातः आगतानि इत्यस्य प्रमाणानि बहूनि सन्ति। किन्तु तानि पदानि इदानीम् उपलब्धेषु लिखितेषु द्रष्टुं न शक्नुमः।

## पुनरावृत्तिः (Recap)

- घटनावादस्य उपस्थापकः सोस्यूर् एव आधुनिकभाषाशास्त्रस्यापि प्रवर्तकः
- भाषाशास्त्रस्य चत्वारः विभागाः सन्ति। वर्णोत्पत्तिविपरिणामप्रकारविचारः, पदनिष्पत्तिप्रकारविचारः, वाक्यरचनाप्रकारविचारः, अर्थविपरिणामप्रकारविचारश्चेति।
- शब्दानामुत्पत्तिः पठ्यते वर्णोत्पत्तिविपरिणामप्रकारविचारे। शब्दानां, विपरिणामः अपि अत्र पठ्यन्ते।
- पदानां निष्पत्तिः, प्रकृतिप्रत्ययादिभिः पदसंरचना इत्यादयः पदनिष्पत्तिप्रकारविचारे पठ्यन्ते।
- वाक्ये पदानां क्रमीकरणं तथा तेषां परस्परसम्बन्धः च वाक्यरचनाप्रकारविचारस्य विषयः
- अर्थस्य विपरिणामः कथं सम्भवति तथा कथं पूर्वतनाः अर्थाः पदेन सम्बद्धाः इत्येते विषयाः अर्थविपरिणामप्रकारविचारस्य विषयाः।
- चरित्रपरभाषापठनम्, विवरणात्मकपठनमिति अन्यः सम्प्रदायः अपि वर्तते।
- एकस्याः भाषायाः चरित्रपरस्य विकासस्य पठनं चरित्रपरभाषापठने क्रियते।
- विवरणात्मकपठने तु एकस्मिन् काले भाषायाः अवस्था कीदृशी इति पठ्यते।
- विवरणात्मकपठने चरित्रपररीतिः तुलनात्मकरीतिः च वर्तेते।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. घटनावादस्य उपस्थापकः कः ?
2. भाषाशास्त्रे कति विभागाः सन्ति।
3. आधुनिकभाषाशास्त्रस्य आविष्कर्ता कः ?
4. शब्दानामुत्पत्तिमधिकृत्य भाषाशास्त्रस्य कस्मिन् विभागे पठनं क्रियते?
5. प्रकृतिप्रत्यादिभिः पदसंरचना भाषाशास्त्रस्य कस्य विभागस्य विषयः?

6. वाक्ये पदानां क्रमीकरणमधिकृत्य भाषाशास्त्रस्य कस्मिन् विभागे पठ्यते ?
7. अर्थस्य विपरिणामः कस्मिन् विभागे पठ्यते ?
8. चरित्रपरस्य विवरणात्मकस्य च भाषापठनस्य उपस्थापकः कः ?
9. केषां मते चरित्रपरं पठनम् अप्रधानं भवति ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत
## (Answer the following questions in one or two sentences)

1. चिह्नशास्त्रं नाम किम् ?
2. भाषाशास्त्रस्य विभागाः के ?
3. वर्णोत्पत्तिविपरिणामप्रकारशास्त्रस्य विषयः कः?
4. पदनिष्पत्तिप्रकारशास्त्रस्य विषयः कः?
5. वाक्यरचनाप्रकारशास्त्रस्य विषयः कः?

## एकैकया खण्डिकया उत्तरं लिखत
## (Answer the following questions in a paragraph)

1. वर्णोत्पत्तिविपरिणामप्रकारमधिकृत्य विशदयत ।
2. शब्दविपरिणामप्रकारविचारमधिकृत्य विशदयत ।
3. अर्थविपरिणामप्रकारमधिकृत्य विशदयत ।
4. विवरणात्मकपठने रीतिद्वयमधिकृत्य विशदयत ।

## निर्दिष्टाभ्यासः (Assignments)

1. भाषाशास्त्रस्य विभागान् विशदयत ।
2. चरित्रपरविवरणात्मकपठनयोः भेदं विशदयत ।

3. आधुनिकभाषाशास्त्रमधिकृत्य विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. फेर्डिनन्ड्. डि. सोस्यूर्।
2. चत्वारः।
3. फेर्डिनन्ड्. डि. सोस्यूर्।
4. वर्णोत्पत्तिविपरिणामप्रकारविचारे।
5. पदनिष्पत्तिप्रकारविचारः।
6. वाक्यरचनाप्रकारविचारः।
7. अर्थविपरिणामप्रकारविचारे।
8. फर्डिनन्ड् . डि. सोस्यूर्।
9. आधुनिकभाषाशास्त्रज्ञानां मते।

## सूचनाग्रन्थाः (References)


1. श्रीमन्नारायणमूर्तिः एम् , संस्कृतभाषाशास्त्रोपोद्घातः, डि.के. पब्लिकेशन्स्, दिल्ली, 1984.
2. टि. के रामचन्द्र अय्यर्, ए स्टुडन्टस् हान्टबुक्क् ओफ् कम्पारट्टीव् फिलोलजि, आर्.एस् वाध्यार् आन्ट् सन्स् , कल्पात्ति, पालक्काट्, 1987.
3. रोबिन्स् आर्. एच्. भाषाशास्त्रलघुचरित्रम् , रौट्लेट्ज्, 2013.
4. भाषाशास्त्रप्रवेशिनी, प्रोफ. आर्. एस्. वेङ्कटरामशास्त्री, कुप्पुस्वामिशास्त्रि रिसेर्च् इन्स्टिट्यूट्, चेन्नै 1996.

# BLOCK-2

# भाषायाः उत्पत्तिः

SGOU

# Unit - 1

# भाषायाः निर्वचनम्

## उद्देश्यानि (Learning Outcomes)

- भाषाशास्त्रमधिकृत्य सामान्यपरिज्ञानम्।
- भाषामधिकृत्य बहूनां निर्वचनपरिज्ञानम्।
- भाषायाः प्राधान्यावगतिः।
- भाषायाः व्याप्तिमधिकृत्य ज्ञानम्।

## प्राग्व्यपेक्षाः (Prerequisites)

एकस्याः भाषायाः अन्याभिः भाषाभिः सह सम्बन्धः कः इति निरीक्षणं कुर्मश्चेत् भाषाणां मध्ये सादृश्यं तथा वैजात्यञ्च द्रष्टुं शक्नुमः। भाषाणां तुलनात्मकं चरित्रपरञ्च अध्ययनमेव भाषाशास्त्रमित्युच्यते। भाषासंस्कारसंवेदनस्य आशयसंवेदनस्य च प्रधानः उपाधिः भवति। शास्त्रीयरीत्या भाषाणां पठनमेव भाषाशास्त्रमित्युच्यते। भाषामधिकृत्य परिज्ञानम् , भाषायाः उत्पत्तिविषये काचन चिन्ता, वागर्थयोः बन्धः ज्ञातव्यः च।

## मुख्यपदानि (Keywords)

आशयविनिमयोपाधिः, एन्सैक्लोपीडिया ब्रिटानिका, कण्ठताल्वादिभ्यः, औत्पत्तिकः, श्रृङ्खलारूपा चिन्ता, मानसिकविकासः, आल्डस् हक्स्लि, चिह्नम्, केवलशब्दव्यापारः, वेदनाक्रोधबुभुक्षादयः।

## Discussion

भाषा आशयविनिमयोपाधिः इत्यत्र कस्यापि विप्रतिपत्तिः नास्ति। बहुधा तस्य निर्वचनं बहुभिः कृतम्। एन्सैक्लोपीडिया ब्रिटानिका एवं भाषां विशदयति, यथा, परम्परागतरीत्या लिख्यामानानां भाष्यमाणानां च चिह्नानां समूहः भवति भाषा इति। विचिन्त्य वक्तुं शक्नोतीति मनुष्यस्य मृगादिभ्यः भेदः।

## भाषा

का नाम भाषा इति अन्वेषणे बहवः भाषां बहुधा निर्वचन्ति। किन्तु एकमपि पूर्णमिति वक्तुं न शक्नुमः। केचन वदन्ति 'भाषा नाम केषाञ्चन जनानां मध्ये वर्तमानः आशयविनिमयोपाधिः भवति यत्र ते मनुष्याः अन्तर्भवन्ति' इति। भाषायाः अन्यदेकं निर्वचनमेवं भवति यत् कण्ठताल्वादिभ्यः स्थानेभ्यः निर्गतान् शब्दान् उपयुज्य क्रियमाणः आशयविनिमयोपाधिः या तस्मिन्नेव समूहे उष्यमाणैः अन्यैरपि मनुष्यैः श्रोत्रेन्द्रियद्वारा श्रोतुं शक्या इति। एन्सैक्लोपीडिया ब्रिटानिका एवं भाषां विशदयति , यथा ,परम्परागतरीत्या लिख्यामानानां भाष्यमाणानां च चिह्नानां समूहः भवति भाषा इति।

भाषा एव सामूहिकजीवनस्य व्यक्तिजीवनस्य च आधारशिला। मृगादिभ्यः मनुष्यस्य व्यत्यासः एव एषः यद् चिन्तां कृत्वा वक्तुं शक्नोतीति। भाषणं तु चिन्तां विना नैव साध्यम्। यद्यपि मृगाणामपि वेदनाक्रोधबुभुक्षादयः विकाराः सन्ति तथापि मनुष्यानिव श्रृङ्खलारूपेण तेषां चिन्ता न प्रवर्तते। आदिममनुष्याः अपि मृगेभ्यः अधिकाः भिन्नाः न भवेयुः। मानसिकविकासेन साकं भाषा अपि तेषां अभेद्योपकरणमभवत्। तथा एव मानसिकविकासस्य महान् उपाधिः एषा इत्यतः एव परिणामप्रक्रियायाःउच्चश्रेण्यां मनुष्यः संस्थापितः।

एकैकोऽपि मनुष्यः द्वित्रिभाषाः जीवने स्वांशीकरोति। आजीवनं भाषामुपयुज्यैव मानवः अग्रे चलति। मनुष्यः भाषया एव जीवति , चलति तथा पञ्चाशत्प्रतिशतमपि अस्तित्वं भाषया एव इति आल्डस् हक्स्लि वदति। उच्चार्यमाणस्य एकैकस्यापि पदस्य रूपं तथा अर्थश्च स्तः। एतद्द्वयमेव सम्भाषणस्य शारीरिकं तथा मानसिकं च भागं जनयति। यदा उच्चारयामः तदा केवलशब्दव्यापारः न तत्र प्रवर्तते किन्तु चिन्तायाः क्रमीकरणमपि तत्र क्रियते। एवञ्च शारीरिकः तथा मानसिकश्च व्यापारः युगपत्प्रवर्तते। अतः एव शब्दः अर्थात् पृथक् न तिष्ठति। अतः उच्यते –'औत्पत्तिकस्तु शब्दस्य अर्थेन सम्बन्धः' , 'वागर्थाविव सम्पृक्तौ' इत्येवम्।

## पुनरावृत्तिः (Recap)

1. भाषा नाम केषाञ्चन जनानां मध्ये वर्तमानः आशयविनिमयोपाधिः भवति यत्र ते मनुष्याः अन्तर्भवन्ति
2. भाषा नाम कण्ठताल्वादिभ्यः स्थानेभ्यः निर्गतान् शब्दान् उपयुज्य क्रियमाणः आशयविनिमयोपाधिः या तस्मिन्नेव समूहे उष्यमाणैः अन्यैरपि मनुष्यैः श्रोत्रेन्द्रियद्वारा श्रोतुं शक्या।
3. एन्सैक्लोपीडिया ब्रिटानिका एवं भाषां विशदयति , यथा ,परम्परागतरीत्या लिख्यमानानां भाष्यमाणानां च चिह्नानां समूहः भवति भाषा।
4. मृगादिभ्यः मनुष्यस्य व्यत्यासः एव एषः यद् चिन्तां कृत्वा वक्तुं शक्नोतीति।
5. मनुष्यः भाषया एव जीवति , चलति तथा पञ्चाशत्प्रतिशतमपि अस्तित्वं भाषया एव इति आल्डस् हक्स्लि वदति।
6. औत्पत्तिकस्तु शब्दस्य अर्थेन सम्बन्धः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. परम्परागतरीत्या लिख्यमानानां भाष्यमाणानां च चिह्नानां समूहः किमुच्यते?
2. चिन्तां विना मनुष्याय किं न साध्यम् ?
3. शब्दः कस्मात् पृथक् न तिष्ठति?
4. उच्चार्यमाणस्य पदस्य मानसिकः भागः किं जनयति ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत
## (Answer the following questions in one or two sentences)

1. एन्सैक्लोपीडिया ब्रिटानिका भाषां केन विशदयति ?

2. भाषायाः महत्वं सूचयतु ।

## एकैकया खण्डिकया उत्तरं लिखत
(Answer the following questions in a paragraph)

1. भाषायाः स्वरूपं विशदयत ।

## निर्दिष्टाभ्यासः (Assignments)

1. भाषाविषये कतिपयानां निर्वचनं संगृह्णीत ।
2. भाषायाः प्राधान्यं विशदयत ।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. भाषा
2. भाषणम्
3. अर्थात्
4. अर्थम्

## सूचनाग्रन्थाः (References)


1. श्रीमन्नारायणमूर्तिः एम् , संस्कृतभाषाशास्त्रोपोद्घातः, डि.के. पब्लिकेशन्स्, दिल्ली, 1984.
2. टि. के रामचन्द्र अय्यर्, ए स्टुडन्टस् हान्टबुक्क् ओफ् कम्पारट्टीव् फिलोलजि, आर्.एस् वाध्यार् आन्ट् सन्स् , कल्पात्ति, पालक्काट्, 1987.
3. रोबिन्स् आर्. एच्. भाषाशास्त्रलघुचरित्रम् , रौट्लेट्ज्, 2013.

4. भाषाशास्त्रप्रवेशिनी, प्रोफ. आर्. एस्. वेङ्कटरामशास्त्री, कुप्पुस्वामिशास्त्रि रिसेर्च् इन्स्टिट्यूट्, चेन्नै 1996.

SGOU

# Unit- 2

## भाषायाः उत्पत्तिः

### उद्देश्यानि (Learning Outcomes)

- चिन्तायाः संप्रेषणे विद्यमानम् अवस्थात्रयमधिकृत्य सामान्यपरिज्ञानम्
- भाषासविशेषताः अधिकृत्य परिज्ञानम्
- लेखनभाषायाः सम्भाषणभाषायाश्च भेदपरिज्ञानम्

### प्राग्व्यपेक्षाः (Prerequisites)

का नाम भाषा इति अन्वेषणे बहवः भाषां बहुधा निर्वचन्ति। भाषा एव सामूहिकजीवनस्य व्यक्तिजीवनस्य च आधारशिला। मृगादिभ्यः मनुष्यस्य व्यत्यासः एव एषः यद् चिन्तां कृत्वा वक्तुं शक्नोतीति। भाषणं तु चिन्तां विना नैव साध्यम् इति पूर्वस्मिन् एकके अधीतम्। भाषासम्प्रेषणमधिकृत्य परिज्ञानम् , अङ्गचलनादीनां परिमितिः, वर्गभाषादीनधिकृत्य परिज्ञानम् च। भाषायाः सविशेषतां अर्थ निर्णयति।

### मुख्यपदानि (Keywords)

सोदरभाषा, वर्गभाषा, मातृकाभाषा, घटनाद्वैविध्यम्, उत्पादकत्वम्,भाषोत्पत्तिः, सम्भाषणसमूहः, अङ्गचलनैः, शब्दद्वारा, सङ्कीर्णा, इट्टालियन्, भाषास्वभावः।

### Discussion

एकस्मात् अन्यं प्रति चिन्तायाः संप्रेषणे तिस्रः अवस्थाः सञ्जाताः स्युः। 1) अङ्गचलनैः 2) शब्दद्वारा 3) उच्चारितानां लेखनेन। स्वकीयां चिन्तां संवेदयितुं सम्भाषणार्थम् उपयुञ्जानः शब्दः सम्भाषणसमूहः।

प्रत्येकस्य वर्गस्य प्रत्येकभाषाः भवितुमर्हन्ति। प्रत्येकविषये इच्छा भवति केषाञ्चन जनानाम्। सोदरभाषासु अश्रुतानामपि वाक्यानां रचना मनुष्येण क्रियते।

## भाषोत्पत्तिः

भाषा एकस्मात् मनुष्यात् अन्यं प्रति शब्दद्वारा संप्रेष्यमाणा चिन्ता। सा मानवस्य मानसिकशारीरिकदक्षता एव। मनुष्यः चिन्तयति, तथा एव तस्य चिन्तां प्रसारयितुमिच्छति च। प्रथमं सः ओष्ठस्य चलनेन आरब्धवान् स्यात्, किन्तु तत्समनन्तरं शब्दः उत्पन्नः भवेत्।

मनुष्यः स्वयं जीवितुं न शक्नोति इत्यतः सामूहिकगणान् निर्मितवान् भवेत्। अतः एव स्वकीयमन्तर्गतं अन्यं वक्तुमुपायः आवश्यकः। एतद् सः त्रिप्रकारेण कर्तुं शक्नोति। 1) समीपे अथवा किञ्चिद्दूरे चेत् चिह्नेन अथवा अङ्गचलनैः प्रथमं आशयानां विनिमयं कृतवान् स्यात्। किन्तु सङ्कीर्णां मनुष्यचिन्तां प्रकटीकर्तुं एषः उपायः न पर्याप्तः। 2) समीपे चेत् अङ्गचलनैः साकं शब्दमपि उपयोक्तुं शक्नोति। प्रतिमनुष्यम् अङ्गचलनस्य भेदाः वर्तन्ते। किन्तु अधिकतया समूहैरेव तत् परिपाल्यते। इट्टालियन् जनाः आङ्गलेयानपेक्ष्य अधिकतया अङ्गचलनानि उपयुञ्जते। 3) तृतीये सोपाने युक्तेषु वस्तुषु स्वकीयां चिन्ताम् आलेखितवान् स्यात्।

भाषापठनसम्बद्धानि अधः प्रदत्तानि पदानि अपि उपयुञ्महे।

**भाषा (speech)**- स्वकीयां चिन्तां संवेदयितुं सम्भाषणार्थम् उपयुञ्जानः शब्दः।

**सम्भाषणसमूहः( Speech community)** - समानां भाषां भाष्यमाणः समूहः।

**सोदरभाषा ( Dialect)**- समानां भाषां वदन्ति चेदपि प्रदेशभेदाद् ईषद्भेदः विभिन्नप्रकारेण भवितुमर्हति। सोदरभाषाः अन्येभ्यः बहुभिः कारणैः व्यत्यस्ताः भविष्यन्ति। तत्र 1) शब्दभेदाद् 2) व्यत्यस्तव्याकरणप्रयोगैः 3) समानपदस्य अर्थव्यत्यासाद्।

**वर्गभाषा**–प्रत्येकस्य वर्गस्य प्रतिदेशं च प्रत्येकभाषाः भवितुमर्हन्ति। प्रत्येकविषये इच्छा भवति केषाञ्चन जनानाम्। उदाहरणं वदामश्चेत् विक्रेतारः केचन सन्ति चेत् विक्रयणार्थं तेषां प्रत्येकभाषाणामुपयोगः भवति। अन्येभ्यः भिन्नानि कानिचन पदानि एते आपणिकाः उपयुञ्जते। एवं प्रत्येकोपकरणानां आशयानां साङ्केतिकोपकरणानां नामानि प्रत्येकविभागानां भाषायाः उत्पन्नानि भवेयुः। एतादृशरीत्या केषाञ्चन विशेषवर्गाणां गणभाषा, वर्गभाषा इति कथ्यते।

**भाषासविशेषताः**

सांस्कारिकरीत्या उन्नतकुलजातानाम् अथवा उन्नतपदव्यां वर्तमानानां भाषायां बहुधा भेदाः दृश्यन्ते। उदाहरणं वदामश्चेत् संस्कृतनाटकेषु ब्राह्मणानां राज्ञाञ्च सम्भाषणभाषा संस्कृतञ्चेत् कासाञ्चन स्त्रीणां तथा अन्येषां च भाषा प्राकृतं भवति खलु? एषा एव भाषासविशेषता इत्युच्यते।

**मातृका भाषा**

सोदरभाषासु एव अधिकतया प्रसिद्धानि पदानि उपयुज्य मातृकाभाषा उत्पद्यते। समानरीत्या राजधानीषु उपयुज्यमाना भाषा मातृकारूपेण परिणमते यतो हि अधिकाः जनाः तां भाषां वदन्ति। अन्येऽपि समानभाषाभाषिणः अपि एतां भाषां जानन्ति यतो हि राजधान्याः तेषां कार्यमपि साधनीयं स्यात्।

**लेखनभाषा अथवा साहित्यम्**

लेखनभाषा अपि नूतनान् विषयान् योजयति । लेखनभाषा साहितीपरा भवति। कृत्यता (precision) अपि तस्य अधिका भवति। सम्भाषणभाषायां विद्यमानानि अनङ्गीकृतानि पदानि लेखनभाषायां न भवन्ति।

प्रथमम् अभिलेखानां निर्माणार्थमेव लेखनभाषा उपयुक्ता स्यात्। अतः एव अशोकचक्रवर्तिणा लिखितानि शिलालेखनानि तस्य कालस्य भाषामभिव्यनक्ति।

किन्तु कविताः गातुमथवा पठितुमेव उपयुक्तानि पदानि सम्भाषणभाषायामेव निर्मितानि स्युः। आदिममनुष्यस्य अपि भाषायां कविताः दृश्यन्ते। लेखनस्य यदा उद्भवः जातः तदा गद्यसाहित्यमपि अजायत। पद्यमिव अत्रापि सम्भाषणभाषा अधिकतया न दृश्यते। सूत्रसाहित्यस्य उद्भवेन भाषायाः अन्यथा अपि उपयोगः अस्माभिः दृष्टः।

**भाषास्वभावाः**

मानविकभाषायाः विशिष्य स्वभावद्वयं वर्तते 1) घटनाद्वैविध्यम् (Duality of structure) 2) उत्पादकत्वम् (Productivity)

घटनाद्वैविध्यम् – घटनाद्वैविध्यं इत्युक्तौ घटनायां द्वैविध्यं वर्तते इत्येवार्थः। वाक्यमेव भाषायाः एककम्। तत्र प्रथमस्तरः भवति पदम्। लघुतमं सार्थकं एककं पदम् एव। द्वितीयस्तरः भवति वर्णः। पदं वर्णैरुत्पद्यते चेदपि

वर्णानामर्थवत्वं नास्ति। द्वितीयः स्वभावः भवति उत्पादकत्वम्। स्वकीयभाषायाम् अनन्तानां वाक्यानामुत्पादने अवगमने च दक्षता सर्वेषामस्ति। अश्रुतानामपि वाक्यानां रचना मनुष्येण क्रियते।

## पुनरावृत्तिः (Recap)

- एकस्मात् अन्यं प्रति चिन्तासंप्रेषणे तिस्रः अवस्थाः सन्ति।
- समीपे अथवा किञ्चिद्दूरे चेत् चिह्नेन अथवा अङ्गचलनैः प्रथमं आशयानां विनिमयं कृतवान् स्यात्। किन्तु सङ्कीर्णां मनुष्यचिन्तां प्रकटीकर्तुं एषः उपायः न पर्याप्तः।
- समीपे चेत् अङ्गचलनैः साकं शब्दमपि उपयोक्तुं शक्नोति। प्रतिमनुष्यम् अङ्गचलनस्य भेदाः वर्तन्ते।
- अन्तिमे स्तरे स्वकीयां चिन्तां युक्तेषु वस्तुषु आलेखितवान् स्यात्।
- सोदरभाषायामपि भेदाः भवितुमर्हन्ति।
- प्रत्येकवर्गस्यापि भाषा भवति।
- सोदरभाषासु एव अधिकतया प्रसिद्धानि पदानि उपयुज्य मातृकाभाषा उत्पद्यते
- सम्भाषणभाषायां विद्यमानानि अनङ्गीकृतानि पदानि लेखनभाषायां न भवन्ति।
- मानविकभाषायां घटनाद्वैविध्यम् वर्तते।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. आङ्गलेयानपेक्ष्य के अङ्गचलनानि अधिकतया उपयुञ्जते?
2. समानां भाषां वदति चेदपि ईषद्भेदेन दृश्यमाना भाषा का?
3. घटनायां विद्यमानं द्वैविध्यं किमुच्यते ?
4. मानविकभाषायाः स्वभावद्वयं किम्?
5. .......एव भाषायाः एककम्। (रिक्तं पूरयत)
6. स्वकीयभाषायामनन्तानां पदानां निष्पादनं किमुच्यते?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत
**(Answer the following questions in one or two sentences)**

1. चिन्तासंप्रेषणस्य तिस्रः अवस्थाः काः?
2. सोदरभाषा नाम का?
3. किं नाम घटनाद्वैविध्यम्?
4. उत्पादकत्वं नाम किम्?

## एकैकया खण्डिकया उत्तरं लिखत
**(Answer the following questions in a paragraph)**

1. लेखनभाषामधिकृत्य विशदयत।
2. चिन्तासंप्रेषणस्य अवस्थात्रयमधिकृत्य विशदयत।
3. वर्गभाषाः अधिकृत्य विशदयत।

## निर्दिष्टाभ्यासः (Assignments)

1. भाषापठनसम्बद्धानि कार्याणि विशदयत।
2. भाषासविशेषताः विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. इट्टालियन् जनाः।
2. सोदरभाषा।
3. घटनाद्वैविध्यम्।
4. 1) घटनाद्वैविध्यम् (Duality of structure) 2) उत्पादकत्वम् (Productivity).

5. वाक्यम्।

6. उत्पादकत्वम्।

## सूचनाग्रन्थाः (References)

1. श्रीमन्नारायणमूर्तिः एम्, संस्कृतभाषाशास्त्रोपोद्घातः, डि.के. पब्लिकेशन्स्, दिल्ली, 1984.
2. टि. के रामचन्द्र अय्यर्, ए स्टुडन्टस् हान्टबुक्क् ओफ् कम्पारट्टीव् फिलोलजि, आर्.एस् वाध्यार् आन्ट् सन्स्, कल्पात्ति, पालक्काट्, 1987.
3. रोबिन्स् आर्. एच्. भाषाशास्त्रलघुचरित्रम्, रौट्लेट्ज्, 2013.
4. भाषाशास्त्रप्रवेशिनी, प्रोफ. आर्. एस्. वेङ्कटरामशास्त्री, कुप्पुस्वामिशास्त्रि रिसेर्च् इन्स्टिट्यूट्, चेन्नै 1996.

# Unit - 3
# भाषायाः उत्पत्तौ विद्यमानाः नियमाः

## उद्देश्यानि (Learning Outcomes)

- भाषायाः उत्पत्तौ विद्यमानान् सिद्धान्तानधिकृत्य परिज्ञानं लभते।
- भाषासिद्धान्तानां परिमितिमधिकृत्य परिज्ञानं लभते।
- बौ – वौ सिद्धान्तः, पू – पू सिद्धान्तः, डिङ् – डोङ् सिद्धान्तः, यो- हि- हो सिद्धान्तः इत्यादीनां परिज्ञानं लभते।

## प्राग्व्यपेक्षाः (Prerequisites)

भाषायाः उत्पत्तिसिद्धान्तानधिकृत्य चिन्तनम्। भाषायाः उत्पत्तौ बहवः सिद्धान्ता बहुभिः उपस्थापिताः। भाषा विशेषेण एकस्मात् मनुष्यात् अन्यं प्रति शब्दद्वारा संप्रेष्यमाणा चिन्ता। सा मानवस्य मानसिकशारीरिकदक्षता एव। भाषाशास्त्रस्य आदिमे काले पण्डिताः प्राथमिकः शब्दः कथमुत्पन्नः इत्यस्मिन् विषये बहुधा चिन्तामकुर्वन्।भाषासिद्धान्तानधिकृत्य परिज्ञानम् अत्र लभते।

## मुख्यपदानि (Keywords)

बौ - वौ सिद्धान्तः, पू- पू सिद्धान्तः, डिङ् -डोङ् सिद्धान्तः, यो- हि- हो सिद्धान्तः।

## Discussion

भाषायाः उत्पत्तौ बहवः सिद्धान्ता बहुभिः उपस्थापिताः। किन्तु अद्यावधि तत्र निष्कृष्टं कारणं वक्तुं कोऽपि नाशक्नोत्। बौ-वौ सिद्धान्तः, पू- पू सिद्धान्तः, डिङ् – डोङ् सिद्धान्तः इत्येवं बहवः सिद्धान्ताः भाषायाः उत्पत्तिविषये उपस्थापिताः। किन्तु एकोऽपि सिद्धान्तः सम्पूर्णा भाषा कथमुत्पन्ना इति निर्वक्तुं नाशक्नोत्।

## भाषायाः उत्पत्तिसिद्धान्ताः

भाषाशास्त्रस्य आदिमे काले पण्डिताः प्राथमिकः शब्दः कथमुत्पन्नः इत्यस्मिन् विषये बहुधा चिन्तामकुर्वन्। एकः शब्दः एकस्मिन्नर्थे कथमुत्पन्नः इति विषये विभिन्नाः सिद्धान्ताः समुत्पन्नाः। पौराणिकाः भाषा ईश्वरस्य दानमेवेति विश्वसन्ति। उक्तञ्च-

"संस्कृतं नाम दैवी वाक् अन्वाख्याता महर्षिभिः"

प्राचीननैयायिकाः अपि वदन्ति –

'अस्माच्छब्दादयमर्थो बोद्धव्यः इतीश्वरेच्छा शक्तिः'। इति।

किन्तु भाषा दैवेन निर्मिता इति भाषाशास्त्रज्ञाः न विश्वसन्ति। एवं तर्हि भाषा परिपूर्णा अभविष्यत् इति तेषां मतम्। भाषा कालेन परिष्कृतः सङ्कीर्णः उपाधिरेव इति ते वदन्ति। मनुष्येषु वर्तमानात् मानसिकव्यापारात् भाषा एवं समुद्भूता इत्येव तेषाम् अभिप्रायः।

पूर्वतनाः भाषाशास्त्रज्ञाः अधःप्रदत्तान् सिद्धान्तान् भाषायाः उत्पत्तिमधिकृत्य उपस्थापितवन्तः।

### बौ – वौ सिद्धान्तः (अनुकरणसिद्धान्तः)

एतत्सिद्धान्तानुसारं प्रथमं शब्दाः अनुकरणत्वेन समुत्पन्नाः। उदाहरणं वदामश्चेत् मनुष्यः शुनकस्य शब्दस्य अनुकरणं कृत्वा शुनकं बौ वौ इत्याहूतवान्। एतस्य शब्दस्य बुक्कनम् अथवा श्वा इत्यर्थः। काकः, कोकिलः इत्यादिशब्दाः अपि एवमेव समुत्पन्नाः इति अयं सिद्धान्तः वदति। किन्तु एतेन भाषायां विद्यमानाः अत्यल्पाः शब्दाः एव विशदीक्रियन्ते।

### पू – पू सिद्धान्तः (अनवधानतया याद‍ृच्छिकतया वा उत्पन्नः शब्दः)

एतत्सिद्धान्तानुसारं भाषा वेदनया अथवा अन्येन विकारेण अकस्मात् उत्पन्नेभ्यः शब्देभ्यः जायते। जुगुप्सया अथवा अवमानेन पू अथवा पिष् इति शब्दः अनवधानतया उत्पद्यते। एवमेव यदा अद्भुतं किमपि पश्यति अथवा केनापि कारणेन आश्चर्यम् उत्पद्यते, मुखात् तदानीमेव हा, हन्त,अहो इत्यादयः शब्दाः उत्पद्यन्ते। एताद‍ृशशब्दोत्पादने चिन्तायाः प्रवृत्तिरेव नास्ति। किन्तु भाषायाः प्रवृत्तौ अवश्यं चिन्ता अपि तत्र प्रवर्तनीया एव। अकस्मात् उद्भूताः शब्दाः तु अन्यशब्दाः इव पठिताः एव। एतेनापि सिद्धान्तेन अतिन्यूनाः शब्दाः विशदीक्रियन्ते।

## डिङ् -डोङ् सिद्धान्तः (परिस्पन्दसिद्धान्तः)

एतत्सिद्धान्तानुसारं भाषा एकस्याः वृत्तेः परिणामः भवति। सा मनुष्यस्यैव सविशेषता यया बाह्यात् यत् अनुभवामः तस्य परिस्पन्दः अन्तः अपि भवतीति। प्रकृतिनियमानुसारं यस्य कस्यापि उपरि प्रहारे सति ततः शब्दः उत्पद्यते। एकैकस्यापि पदार्थस्य स्वकीयः शब्दः भवति। मनुष्यस्य अन्तःपदपदार्थयोर्मध्ये समन्वयः दृश्यते। सः समन्वयः एव भाषा इति कथ्यते। पू पू सिद्धान्तस्य विस्तारः एव एषः। शिञ्जितम्, घर्घरम् इत्यादयः शब्दाः एव एतेन सिद्धान्तेन विशदीक्रियन्ते। एषः अपि अतिविरलानि पदानि एव विशदीकरोति। माक्स् मुल्लर् एव अस्य सिद्धान्तस्य उपस्थापकः। किन्तु अनन्तरं तेनैव एषः सिद्धान्तः परित्यक्तः।

## यो- हि- हो सिद्धान्तः (कर्मकरणसमये संजातः शब्दसिद्धान्तः)

दृढप्रयत्नानन्तरं उच्छ्वासनिश्वासाभ्यां शरीराय आश्वासः जायते।तदानीं कण्ठेन भिन्नरीत्या स्पन्दनं क्रियते। कर्मकराः यदा अत्यायासकरं कार्यं कुर्वन्ति तदा मिलित्वा उच्चैः हो -हो , हा-हा इत्येवं शब्दमुत्पादयन्ति। एते शब्दाः कृतेन कार्येण सह अनन्तरं सम्बद्धाःभवन्ति, तस्य नामत्वेन परिणमते च। एवमाद्यमुच्चरितः शब्दः होल् अथवा हीव् इत्येवं किमपि भवितुमर्हति। नोयिर् नाम पण्डितेन प्रस्तावितः अयं सिद्धान्तः अनुकरणं विना शब्दोत्पत्तिं समर्थयति। नाविकाः यदा नौकां चालयन्ति तदा यो-हि-हो इति शब्दमुत्पादयन्ति। एतत्सिद्धान्तानुसारं कर्मकरणसमये उत्पाद्यमानेन शब्देन अनन्तरकाले कर्म अभिधीयते।

एते सर्वेऽपि सिद्धान्ताः भाषायाः अत्यल्पं भागमेव विशदीकुर्वन्ति। तत्रापि प्रधानपदानि नैव अन्तर्गतानि। मनुष्याणां सम्भाषणसमये उत्पन्नानि पदानि कथं सम्भूतानि इति विशदीकर्तुं एतेषु कोऽपि सिद्धान्तः न पर्याप्तः।

## पुनरावृत्तिः (Recap)

- पौराणिकाः भाषा ईश्वरस्य दानमित्यचिन्तयन्।
- भाषा दैवेन निर्मिता इति भाषाशास्त्रज्ञाः नाङ्गीकुर्वन्ति।
- शब्दाः अनुकरणत्वेन समुत्पन्नाः इति बौ- वौ सिद्धान्तः वदति।
- पू-पू सिद्धान्तानुसारं केनापि विकारेण अकस्मात् उत्पन्नेभ्यः शब्देभ्यः भाषा समुद्भूता इति।
- डिङ् -डोङ् सिद्धान्तनुसारं भाषा वृत्तेः परिणामः भवति।

- डिङ् - डोङ् सिद्धान्तः पू -पू सिद्धान्तस्य विस्तारः एव ।
- कर्मकरणे क्रियमाणाः शब्दाः कर्मणः नाम्ना परिणमते इति यो-हि हो सिद्धान्तः वदति ।
- एते सर्वेऽपि सिद्धान्ताः भाषायाः अत्यल्पं भागमेव विशदीकुर्वन्ति ।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. अकस्मात् विकारेण उत्पन्नेभ्यः शब्देभ्यः भाषा जायते इति कस्य सिद्धान्तस्य अभिप्रायः?
2. भाषा ईश्वरस्य दानमित्यचिन्तयन् इति के वदन्ति?
3. शिञ्जितम् इति कस्य सिद्धान्तस्य उदाहरणम्?
4. डिङ् - डोङ् सिद्धान्तः केन उपस्थापितः?
5. यो- हि- हो सिद्धान्तः केन उपस्थापितः?
6. काकः इति कस्य सिद्धान्तस्य उदाहरणं भवति?
7. अनुकरणं विना शब्दोत्पत्तिं समर्थयति अयं सिद्धान्तः। कः?
8. डिङ्- डोङ् सिद्धान्तस्य उपस्थापकः कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत
**(Answer the following questions in one or two sentences)**

1. प्राचीननैयायिकाः भाषाविषये किं वदन्ति ?
2. पौराणिकाःभाषाविषये किं विश्वसन्ति?

## एकैकया खण्डिकया उत्तरं लिखत
**(Answer the following questions in a paragraph)**

1. बौ- वौ सिद्धान्तमधिकृत्य विशदयत ।
2. पू- पू सिद्धान्तमधिकृत्य विशदयत ।

3. यो- हि- हो सिद्धान्तमधिकृत्य विशदयत।
4. डिङ्- डोङ् सिद्धान्तं विशदयत।

## निर्दिष्टाभ्यासः (Assignments)

1. भाषायाः उत्पत्तिसिद्धान्तान् विशदयत।
2. भाषायाः उत्पत्तौ उपस्थापिताः सिद्धान्ताः सफलाः नाभवन्। विशदयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. पू- पू सिद्धान्तस्य।
2. पौराणिकाः।
3. डिङ्- डोङ् सिद्धान्तस्य।
4. माक्स् मुल्लर् महाशयेन।
5. नोयिर् महाशयेन।
6. बौ- वौ सिद्धान्तस्य।
7. यो-हि- हो सिद्धान्तः।
8. माक्स् मुल्लर्।

## सूचनाग्रन्थाः (References)

1. श्रीमन्नारायणमूर्तिः एम्, संस्कृतभाषाशास्त्रोपोद्घातः, डि.के. पब्लिकेशन्स्, दिल्ली, 1984.
2. टि. के रामचन्द्र अय्यर्, ए स्टुडन्टस् हान्टबुक्क् ओफ् कम्पारट्टीव् फिलोलजि, आर्.एस् वाध्यार् आन्ट् सन्स्, कल्पात्ति, पालक्काट्, 1987.

3. रोबिन्स् आर्. एच्. भाषाशास्त्रलघुचरित्रम् , रौट्लेट्ज्, 2013.
4. भाषाशास्त्रप्रवेशिनी, प्रोफ. आर्. एस्. वेङ्कटरामशास्त्री, कुप्पुस्वामिशास्त्रि रिसेर्च् इन्स्टिट्यूट्, चेन्नै 1996.

SGOU

# BLOCK-3

# भाषाणां वर्गीकरणम्

SGOU

# Unit - 1

# भाषाणां वर्गीकरणम्

## उद्देश्यानि (Learning Outcomes)

- भाषाशास्त्रमधिकृत्य सामान्यपरिज्ञानम् लभते।
- भाषोत्पत्तिपरिज्ञानम् आर्जयति।
- भाषाणाम् अभिवृद्धिपरिज्ञानं सम्पादयति।
- पदानां निष्पत्तिप्रकारविभागम् अवगति।

## प्राग्व्यपेक्षाः (Prerequisites)

भाषायाः उत्पत्तिसिद्धान्तानधिकृत्य चिन्तनम्। भाषायाः उत्पत्तौ बहवः सिद्धान्ता बहुभिः उपस्थापिताः। भाषा विशेषेण एकस्मात् मनुष्यात् अन्यं प्रति शब्दद्वारा संप्रेष्यमाणा चिन्ता। सा मानवस्य मानसिकशारीरिकदक्षता एव। भाषाशास्त्रस्य आदिमे काले पण्डिताः प्राथमिकः शब्दः कथमुत्पन्नः इत्यस्मिन् विषये बहुधा चिन्तामकुर्वन्।भाषासिद्धान्तानधिकृत्य परिज्ञानम्। लोकस्थानां भाषाणां वर्गीकरणमधिकृत्य पठामः।

## मुख्यपदानि (Keywords)

पदानां निष्पत्तिप्रकारप्रवृत्तः विभागः (Morphological Classification), प्रकृत्युपादानस्य समहेतुनिबन्धनो विभागः (Genealogical Classification), एकाक्षरात्मकम्, बह्वक्षरपदात्मकम्, प्रत्ययसहितं/समासनियमबद्धं, चीनीभाषा (Chinese), Agglutinating (समस्तसुघटिता),

## Discussion

भाषाणां वर्गीकरणे बहुभिः भाषाशस्त्रज्ञैः बहवः पद्धतयः प्रक्रियाश्च परिकल्पिताः उपलभ्यन्ते। तासु मुख्यतया स्वीकृते भवतः पदनिष्पत्तिप्रकारसंबन्धिनी सुप् तिङ् इत्यादि प्रत्ययविषयिका वर्गीकरणरीतिः तथा भषाणाम् एकवंशोत्पन्नत्वम् अथवा वंशपरम्पराप्रकारमाधारीकृत्य वर्गीकरणरीतिश्च। प्रथमारीतिः Morphological Classification इति अपरा रीतिः Genealogical Classification इति च व्यवह्रियते। पदानां निष्पत्तिप्रकारप्रवृत्तः विभागः Morphological विभागः तथा प्रकारभेदेन सह प्रकृत्युपादानस्य समहेतुनिबन्धनो विभागः (Root material derivation)- Genealogical विभागः च।

### A. MORPHOLOGICAL CLASSIFICATION:- (Syntactical classification)

धातूनां (प्रातिपदिकानां वा) पदरूपेण परिवर्तनं तथा पदानां वाक्यरूपेण परिवर्तनं (पदान्युपयुज्य वाक्यरूपवत्करणम्) च अस्मिन् वर्गीकरणे आधारो भवति। अतः Morphological classification इति वर्गीकरणं भाषाणां रूपशास्त्रानुसारम् अथवा रूपविज्ञानीयानुसारम् इति वक्तुं शक्यते। तत्र च त्रयो भेदाः सन्ति। ते च यथाक्रमम्- (1) Isolating or Monosyllabic or Radical (एकाक्षरात्मकम्) (ii) Agglutinating प्रत्ययघटितं बह्वक्षरपदात्मकम् (iii) Inflexional or Organic or Amalgamating (प्रत्ययसहितं/समासनियमबद्धं) च। (अत्र पर्यायरूपेण दत्तं संस्कृतं केवलम् अर्थप्रतीत्यै एव न तु पदानुपदं विवर्तितमिति। प्रथमे वर्गे प्रत्ययसहितं/समासनियमबद्धं (Isolating or Monosyllabic Language), यका चैनीस् भाषा। द्वितीये Agglutinating वर्गे तुर्कीभाषा, जापनीस् भाषा, द्राविडभाषाश्च (Turkish, Japanese and Dravidian Languages), तथा तृतीये Inflexional/Organic/Amalgamating वर्गे संस्कृतभाषा, जर्मन् भाषा च (Sanskrit & German Languages) अन्तर्भवन्ति।

(i) एकाक्षरात्मकेषु भाषाप्ररूपेषु (Isolating or Monosyllabic or Radical) केवलपदार्थ एव अक्षरेण पदेन वा व्यज्यते। तथा च वाक्ये एकस्य पदस्य पदान्तरेण सह सम्बन्धः पदानां स्थानैरेव निर्णीयते। अत्र प्रकृतिशब्दाः तथैव विकाररहिताः (परिणामरहिताः) भवन्ति। पदान्तरसंसर्गः पदान्तरसमवायो वा न सम्भवति। आन्तरो बाह्यो वा परिणामश्च नैव भवति। चीनीभाषा (Chinese Language) अस्मिन् विभागे अन्तर्भवतीति पूर्वमेवोक्तम्॥

(ii) बह्वक्षरात्मके अथवा प्रत्ययघटिते पदात्मके भाषाविभागे (Agglutinating Languages) विभिन्नपदानाम् अर्थविनिमयक्रमः सुस्थिरधातुरूपाणां पारस्पर्येण क्रियते। अत्र, वाक्ये प्रकृतिशब्दाः शब्दबोधाविष्काराय व्याकरणनियमानुसारं पदान्तरान्वयनाय च उपसर्गादिसंयुक्ताः भवन्ति। Agglutinating इति पदमेव शब्दाः परस्परसम्बद्धाः (दृढतया संयुक्ताः), न समवेताः (न मिश्रिताः) अविभजनीयतया इति व्यक्तमर्थं दिशति। तुर्कीभाषा, जापनीस् भाषा, द्राविडभाषाः च अस्मिन् विभागे अन्तर्भवन्ति।

(iii) प्रत्ययघटिते समासव्यवस्थानिबद्धे च (Inflectional /Organic/ Amalgamating Languages) विभागे अन्तर्गतासु भाषासु प्रत्यर्थबोधकानि पदानि स्वेषु अर्थान्तरबोधकान् उपसर्ग-आदेश- आगमादीन् स्वीकुर्वन्ति । एताश्च प्रकृत्या साकं मनसाप्यविभजनीयं यथा स्यात्तथा संश्लिष्टाः भवन्ति, येन प्रकृतिरनेकथा परिणमते। परिणामानन्तरं सा प्रकृतिः परिणामात् प्राक् कथमासीदिति ज्ञातुं न शक्यते । अत्र वाक्यार्थाः व्याकरणनियमानुसारं प्रत्ययघटितैः (bound by affixes) पदैरेव सूच्यन्ते। अस्मिन् भाषाविभागे अर्थविनिमयक्रमः पूर्वापरापेक्षया विकस्वरतां प्राप्नोति । आदि- मध्य-अन्त्यप्रत्ययानुसारं (in accordance with prefixes, infixes & suffixes) धातुरूपाणां विकारः (परिणामः) अत्र सुसाध्यो भवति। अत एवायं भाषाविभागः तारतम्येन परिष्कृतं सविशेषगुणात्मकं च भवतीति निगम्यते। यथा संस्कृतभाषा।

उपर्युक्तेषु त्रिषु भाषाविभागेषु प्रथमे Isolating विभागे प्रत्येकं वर्णः/पदम् अर्थव्यञ्जनक्षमं भवति। द्वितीये Agglutinating विभागे धातुः अन्त्यप्रत्ययश्च परस्परघटितौ वर्तेते अपि तौ विभक्तुं शक्येते। तृतीये Inflexional विभागे धातुप्रत्ययौ तथा सुघटितौ इत्यतः उभौ प्रत्येकं निर्धार्य अवगमो दुष्करश्च भवति।

पूर्वोक्तरूपेण त्रिधा वर्गीकरणं यद्यपि स्वाभावतः शास्त्रीयरीत्या कृतं तथापि प्रयुज्यमानानां सर्वासामपि भाषाणां निर्वचनाय (लक्षणकथनाय) सुगमावगमनाय च तन्न पूर्णतया क्षममिति पक्षान्तरोऽप्यस्ति। अतः अधिकतया युक्तिभद्रं रूपशास्त्रानुसारम् अथवा रूपविज्ञानीयानुसारं (Morphologically) स्वतोजातं/ स्वाभाविकं, (Inorganic) परिष्कृतं/परिणामविषयीभूतं (Organic) चेति द्विधा वर्गीकरणम् अङ्गीक्रियते। ततश्च Organic भाषाणां Incorporating, Agglutinating, Inflecting or Amalgamating इति त्रिधा पुनर्विभजनं कार्यम्। तथैव च Inorganic/Positional/

Isolating इति व्यवह्रियमाणासु भाषासु वाक्ये प्रयुक्तानां पदानां परस्परबन्धः केवलं तेषां स्थानानुसारं प्रतीयते, न तु पदानामान्तरिको बाह्यो वा परिणामः दृश्यते। एतासु भाषासु पदानां वाक्ये प्रयोगस्थामाश्रित्य नाम- संज्ञा (Noun), नामविशेषः (Adjective), क्रिया (Verb), क्रियाविशेषणम् (Adverb) इत्यादि विशेषताः जायन्ते॥

**(i) Organic/Incorporating/Polysynthetic/Holophrastic भाषाः।**

तत्र मुख्यशब्दानाम् अथवा प्रधानपदानां सङ्कलनं दृश्यते। किन्तु इतरासु भाषासु पदानि प्रत्येकं प्रत्येकं व्यतिरिक्ततया तिष्ठन्ति। लक्षणयुक्तायां (Incorporating) भाषायां कर्तृ (Subject), क्रिया (Verb), कर्म (Object), विशेषणादि (Adjuncts) सर्वम् एकस्मिन् एव पदे निबद्धं भवति।

**(ii) अथ Agglutinating (समस्तसुघटिता) भाषाः।**

पदस्य विभिन्नघटकाः पौर्वापर्यक्रमेण समस्ततया निबद्धाः दृश्यन्ते। लोके प्रायशः सर्वत्र एतादृश्यः भाषाः सन्ति। Agglutinating भाषाः Incorporating भाषाभ्यः द्विप्रकारं विभिन्नाः भवन्ति । तद्यथा- समस्तमकैकं पदं कुत्रचित्व्यस्ततया अर्थप्रतिपादकं प्रतिभाति। अन्यत्र कुत्रचित्व्यस्तानि पदान्यैकैकशः स्थित्वा समस्तमेकं वाक्यं विशिष्टमेकमर्थञ्च निर्माति।

पुनः Agglutinating भाषाः समासव्यवस्थानुसारं चतुर्धा विभक्तुं शक्यन्ते। तद्यथा-

**(a)** Prefix Agglutinating (आदिप्रत्ययनिबद्धाः)

**(b)** Suffix Agglutinating (अन्त्यप्रत्ययनिबद्धाः)

**(c)** Prefix-Suffix Agglutinating (आदिप्रत्ययान्त्यप्रत्ययनिबद्धाः)

**(d)** Partially Agglutinating (भागिकपदनिबद्धाः) चेति।

दक्षिणाफ्रिक्कादेशे बण्टुभाषाकुटुम्बे वर्तमानाः भाषाः प्रायशः Prefix Agglutinating इति गण्यन्ते। दक्षिणभारते याः द्राविडभाषाः ताः Suffix Agglutinating इति गण्यन्ते। एताः भाषाः Indo-Aryan भाषासु तथा Indo-Aryan भाषाः द्राविडभाषासु च सर्वाङ्गीणं प्रभावमावहन्ति च। Prefix-Suffix Agglutinating भाषाः शान्तसमुद्रद्वीपसमूहेषु तथा Partially Agglutinating भाषाः अनिर्णीतेषु अपभ्रंशदेशीभाषा प्ररूपेषु च लोके तत्र तत्र दृश्यन्ते।

### (iii) Inflecting/Organic/Amalgamating (प्रत्ययसहिताः /समासनियमबद्धाः) भाषाः।

विवच्य निर्णेतुमशक्यैः स्वरव्यञ्जनान्त्यप्रत्ययनिबद्धैः पदनिबन्धनप्रकारैः सम्पुष्टाः भवन्ति एतादृश्यः भाषाः। अत्र अन्त्यप्रत्ययाः पदेषु अनिवार्यरूपेण उद्ग्रथितरूपेण च वर्तन्त। सा च भाषा Dynamically varying (चलनात्मकतया विभिन्नाः) Dynamically invarying (चलनात्मकतया स्थिररूपाः) चेति पुनर्द्विधा। आदिरूपे परिणतिः (Flexion/Flexibility) आन्तरिकः, अपरस्मिंश्च परिणतिः बाह्या (External) च भवति। हीब्रू (Hebrew), अरबिक् (Arabic) इत्येते सेमिटिक् भाषे चलनात्मकतया विभिन्नरूपे (Dynamically varying) तथा इन्डो यूरोप्यन् भाषाः (Indo- European Languages) स्थिररूपेषु भाषाप्ररूपेषु (Dynamically invarying) च अन्तर्भवन्ति। अधः प्रदत्तया पट्टिकया पूर्वोक्तं पदनिष्पत्तिप्रकाराधिष्ठितम् अथवा सुप्तिङादिविचाराधिष्ठितं (Morphologically oy Syntactically classified) भाषावैविध्यम् अनायासमवगन्तुं शक्यते।

**Languages**

1. Inorganic/Positional/Isolating Languages
2. Organic Languages-

**(a)** Incorporating- Completely Incorporating or Poly-synthetic or Holophrastic (Partially Incorporating)

**(b)** Agglutinating- (i) Prefix Agglutinating (ii) Suffix Agglutinating (iii) Prefix- Suffix Agglutinating

**(c)** Inflexional- (i) Dynamically Varying (ii) Dynamically In-varying.

## B. GENEALOGICAL CLASSIFICATION or HISTORICAL CLASSIFICATION

(वंशपरम्परामाधारीकृत्य अथवा एकवंशोत्पन्नत्वमाधारीकृत्य अथवा उत्पत्तिविकास चरित्रमाधारीकृत्य भाषाणां वर्गीकरणम्)

प्रथममेव आमुखे उक्तं यत्प्रकारभेदेन सह प्रकृत्युपादानस्य समहेतुनिबन्धनः (Root material derivation) भवति Genealogical विभागः इति। विभागोऽयं कासाञ्चन भाषाणाम् एकवंशोत्पन्नत्वं सूचयति। एवमुदाह्रियते -

| संस्कृतम् | लाटिन् | इङ्ग्लीष् (आङ्गलेयी) |
| --- | --- | --- |
| एक | unus | one |
| द्वि | duo | two |
| त्रि | tres | three |

एवमादिभिरुदाहरणैः संस्कृत- लाटिन्- इङ्ग्लीष् भाषाणां चरित्रसाजात्यं समानवंशोद्भवता च अवगम्यते। याः भाषाः स्वपदसमूहानां स्वरूपप्रकारेण सह एकस्मात् प्रभवात् उत्पत्तिं प्राप्नुवन्ति ताः सर्वाः भाषाः Genealogical (एकवंशोत्पन्ने) विभागे अन्तर्भवन्ति। एवम् इङ्गीष्, जर्मन्, डच्, डानिष् भाषाणाम् एकवंशोत्पन्नत्वं निगम्यते। यदि बह्व्यः भाषाः एकस्मात् प्रभवात् शब्दादिस्वीकारं कुर्वन्ति यदि च तासु प्रचुरतया प्रातिपदिकशब्दाः विशिष्य, सामान्यवस्तु- प्राणि- क्रिया- बान्धव्यादिद्योतकाः संख्या- सर्वनामद्योतकाश्च तुल्यतया दृश्यन्ते तर्हि ताः सर्वाः भाषाः एकवंशोत्पन्नाः समानयोगक्षेमाः (possessing common materials of expression) चेति तासु परस्परबन्धुतां निर्णेतु शक्यते। अरबिक् (Arabic) भाषातः आधुनिकपारसीकभाषा (Modern Persian Language) पदानि स्वीकरोति इत्यतः आधुनिकपारसिकभाषायाः उत्पत्तिमूलकत्वम् अरबिक् भाषायाः न, किन्तु तत्र भाषासङ्करता (Contamination of languages) एवेति ज्ञातव्यम्। वस्तुतः एतासु सर्वास्वपि इन्डो-यूरोप्यन् भाषैव मूलभूता भवतीति भाषाशास्त्रविदां मतम्।

पदोपादानमेव भाषाणामभिवृद्धौ हेतुर्भवति। काचिद्भाषा भाषान्तरेभ्यः कोशसमृद्ध्यर्थं पदस्वीकारं करोत्यपि तस्याः स्वमूलवंशेन सह बन्धुता न विनष्टा स्यात्। उत्पत्तिबन्धुतायाः पदकोशबन्धुतायाश्च सम्मिश्रणं नैवोचितम्। भाषाणां परम्पराविभजने शब्दानामाकारात्यन्ताभेदः (Identity of shape) न स्वीकार्यः किन्तु शिक्षाधर्मानुसारम् (Phonetics) आकारसादृश्यमेव (Correspondence of shape) आदरणीयं भवति।

एकवंशोत्पन्नानां (Genealogically classified) भाषाणां सामान्यतया द्विप्रकारकत्वम् अस्ति। प्रथमं तावत् तासु भाषासु समानरूपः पदविभागः (Common word material) अस्ति। द्वितीयं तावत् वैयाकरणव्यवस्थानाम् एकरूपता (Resemblance of grammatical devices) च।

प्रसिद्धः सभाषाशास्त्रज्ञः 'ग्रे लूयिस् एच्' महाभागः तस्य 'फौण्डेषन्स् ओफ् लाङ्ग्वेजस्' इति ग्रन्थे (Foundations of Languages- Macmillan company, New York- 1958) भाषाणां वर्गीकरणं केवलम् एकवंशोत्पन्नत्वम् अथवा वंशपरम्पराप्रकारमाधारीकृत्य (Genealogical Classification) एव कर्तव्यमिति समर्थयति। अनया एकवंशोत्पन्नतारीत्या लोके विद्यमानाः सर्वाः भाषाः षड्विंशति भाषागोत्रेषु विभक्तुं शक्यते। तद्यथा-

| | | |
|---|---|---|
| 1) Indo- European | 2) Hamito Semitic | 3) Urailc or FinnoUgaric |
| 4) Altaic | 5) Japanese & Korean | 6) Eskimo- Aleut |
| 7) Caucasian | 8) Ibero- Basque | 9) NewEastern&Asianic |
| 10) Hyperborean or Palaeo- Asiatic | 11) Burushaski | 12) Dravidian |
| 13) Andamanese | 14) Sino-Tibetan | 15) La-Ti |
| 16) South-East Asiatic or Austro-Asiatic | 17) MalayoPolinesian or Austronesian | 18) Papuan |
| 19) Australian | 20) Tasmanian | 21) Sudano-Guinean |
| 22) Bantu | 23) Hottentot-Bushman or Khoon | 24) North American |
| 25) Mexican | 26) Central American | |

## पुनरावृत्तिः (Recap)

- भाषाणां वर्गीकरणे बहुभिः भाषाशास्त्रज्ञैः बहवः पद्धतयः प्रक्रियाश्च परिकल्पिताः उपलभ्यन्ते।
- तासु मुख्यतया स्वीकृते भवतः पदनिष्पत्तिप्रकारसंबन्धिनी सुप् तिङ् इत्यादि प्रत्ययविषयिका वर्गीकरणरीतिः तथा भाषाणाम् एकवंशोत्पन्नत्वम् अथवा वंशपरम्पराप्रकारमाधारीकृत्य वर्गीकरणरीतिश्च।

- प्रथमारीतिः- पदानां निष्पत्तिप्रकारप्रवृत्तः विभागः (Morphological Classification) इति अपरा रीतिः- प्रकारभेदेन सह प्रकृत्युपादानस्य समहेतुनिबन्धनो विभागः (Root material derivation)- Genealogical Classification इति च।
- पदानां निष्पत्तिप्रकारप्रवृत्तः विभागः प्रधानतया त्रयः भेदाः सन्ति- 1) एकाक्षरात्मकम्, 2) प्रत्ययघटितं बह्वक्षरपदात्मकम्, 3) प्रत्ययसहितं /समासनियमबद्धं च।
- उपर्युक्तेषु त्रिषु भाषाविभागेषु प्रथमे विभागे प्रत्येकं वर्णः /पदम् अर्थव्यञ्जनक्षमं भवति। द्वितीये विभागे धातुः अन्त्यप्रत्ययश्च परस्परघटितौ वर्तेते अपि तौ विभक्तुं शक्येते। तृतीये विभागे धातुप्रत्ययौ तथा सुघटितौ इत्यतः उभौ प्रत्येकं निर्धार्य अवगमो दुष्करश्च भवति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. भाषावर्गीकरणं प्रधानतया कति प्रकाराः सन्ति ?
2. कति पदानां निष्पत्तिप्रकारप्रवृत्तविभागाः सन्ति ? (Morphological Classification)
3. भाषाणामभिवृद्धौ हेतुः ....... एव भवति।
4. समस्तसुघटिता भाषाः (Agglutinating) कति प्रकाराः सन्ति ?
5. 'फौण्डेषन्स् ओफ् लाङ्ग्वेजस्' इति ग्रन्थस्य कर्ता कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत
## (Answer the following questions in one or two sentences)

1. पदानां निष्पत्तिप्रकारप्रवृत्तविभागाः के? (Morphological Classification)
2. Agglutinating (समस्तसुघटिता) भाषाविभागाः के ?

## निर्दिष्टाभ्यासः (Assignments)

1. भाषाणां वर्गीकरणं प्रतिपादयत।
2. पदानां निष्पत्तिप्रकारप्रवृत्तान् विभागान् विशदयत।(Morphological Classification)

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. द्विप्रकारः।
2. त्रयः विभागाः।
3. पदोपादानम्
4. चतुर्था।
5. 'ग्रे लूयिस् एच्'

## सूचनाग्रन्थाः (References)


1. श्रीमन्नारायणमूर्तिः एम्, संस्कृतभाषाशास्त्रोपोद्घातः, डि.के. पब्लिकेशन्स्, दिल्ली, 1984.
2. टि. के रामचन्द्र अय्यर्, ए स्टुडन्टस् हान्टबुक्क् ओफ् कम्पारट्टीव् फिलोलजि, आर्.एस् वाध्यार् आन्ट् सन्स्, कल्पात्ति, पालक्काट्, 1987.
3. रोबिन्स् आर्. एच्. भाषाशास्त्रलघुचरित्रम्, रौट्लेट्ज्, 2013.
4. भाषाशास्त्रप्रवेशिनी, प्रोफ. आर्. एस्. वेङ्कटरामशास्त्री, कुप्पुस्वामिशास्त्रि रिसेर्च् इन्स्टिट्यूट्, चेन्नै 1996.

# Unit-2

# इण्डो-यूरोप्यन् भाषापरिवारः

## उद्देश्यानि (Learning Outcomes)

- भाषाशास्त्रस्य विकासमधिकृत्य सामान्यपरिज्ञानम्।
- भाषाशास्त्रस्य विभिन्नाः विभागाः।
- भाषाशास्त्रस्य साम्प्रदायिकपठनमधिकृत्य ज्ञानम्।

## प्राग्व्यपेक्षाः (Prerequisites)

भाषायाः उत्पत्तिसिद्धान्तानधिकृत्य चिन्तनम्। भाषायाः उत्पत्तौ बहवः सिद्धान्ता बहुभिः उपस्थापिताः। भाषा विशेषेण एकस्मात् मनुष्यात् अन्यं प्रति शब्दद्वारा संप्रेष्यमाणा चिन्ता। सा मानवस्य मानसिकशारीरिकदक्षता एव। भाषाशास्त्रस्य आदिमे काले पण्डिताः प्राथमिकः शब्दः कथमुत्पन्नः इत्यस्मिन् विषये बहुधा चिन्तामकुर्वन्।भाषासिद्धान्तानधिकृत्य परिज्ञानम्। भाषाशास्त्रं नाम किमिति परिज्ञानमनिवार्यं भवति। कदा अस्य शास्त्रस्य उत्पत्तिरिति ज्ञातव्यम्। तुलनात्मकपठने किं किमुपयुज्यते इति ज्ञातव्यम्। अत्र भाषापरिवारमाधारीकृत्य पठामः।

## मुख्यपदानि (Keywords)

इन्डो-यूरोप्यन् भाषापरिवारः, आर्यन् अथवा इन्डो इऱानियन्, अर्मेनियन्, ग्रीक् ,अल्बेनियन्, इटालिक्, जर्मानिक्, बाल्टो स्लावोणिक्, केल्टिक्, तोखेरि़यन्, हिट्टैट्, इयोणिक्, आट्टिक्, डानिष्, स्वीडिष्, अवेस्तन्, प्राकृताः, सर्वनामशब्दाः, संख्यावाचकशब्दाः, बन्धुवाचकशब्दाः।

**Discussion**

## इन्डोयूरोप्यन् भाषापरिवारः (Indo-European Family of Languages)

इन्डोयूरोप्यन् भाषापरिवारे बहवः भाषागणाः अन्तर्भवन्ति। ते च यथा-

1. आर्यन् अथवा इन्डो इऱानियन् (Aryan or Indo- Iranian)
2. अर्मेनियन् (Armenian)
3. ग्रीक् (Greek)
4. अल्बेनियन् (Albanian)
5. इटालिक् (Italic)
6. जर्मानिक् (Germanic)
7. बाल्टो स्लावोणिक् (Balto Slavonic)
8. केल्टिक् (Celtic)
9. तोख़ेरियन् (Tokherian)
10. हिट्टैट् (Hittite)

आर्यन् अथवा इन्डोयूऱोप्यन् भाषागणे संस्कृतम्, (Sanskrit) अवेस्तन्, (Avesthan) प्राकृताद्याः (Prakrit etc.)भाषाः च अन्तर्भवन्ति।

ग्रीक् (Greek) भाषागणे इयोणिक्, (Ionic) आट्टिक् (Attic), फ्रेञ्च् (French) इत्याद्याः भाषाश्च अङ्गत्वेन विभाविताः।

जेर्मानिक् (Germanic) भाषागणे गोथिक् (Gothic), डानिष् (Danish), स्वीडिष् (Swedish), आङ्ग्लो साक्सन् इत्याद्याः (Anglo Saxon etc.) भाषाः अन्तर्भाविताः।

बाल्टो स्लावोणिक् (Balto-Slavonic) भाषागणे प्राचीनप्रष्यन्,(Old Prussian) लित्वानियन् (Lithuanian), ऱष्यन् (Russian), लेट्टिक् (Lettic), बल्ग़ियन् (Bulgarian), स्लोवाक्यन् (Slovakian etc.) भाषाः अन्तर्भाविताः।

केल्टिक् (Celtic) भाषागणे (Irish) तथा (Scottish)भाषाश्च अन्तर्भाविताः दृश्यन्ते।

हिट्टैट् (Hittite) भाषा प्राचीन-इन्डो यूरोप्यन् (Old Indo-European) भाषायाः सोदरी इति कश्चित् अभिप्रायः अस्ति। तयोश्च बन्धुता अधोक्तरीत्या सूच्यते।




हिट्टैट् भाषाप्राचीन- इन्डो-यूरोप्यन् भाषागणात् इतरेभ्यः अङ्गभाषाभ्यः (Other members of I.E. family) प्रागेव विघटिता इति मन्तुं शक्यते।

पूर्वोक्तस्य दशसंख्याकस्य भाषापरिवारस्य आर्यन् (Aryan), इन्डो जेर्मानिक् (Indo Germanic), इन्डो यूरोप्यन् (Indo- European), इन्डो केल्टिक् (Indo-Celtic) इत्यादीनि नामानि पर्यायतया सन्ति। भाषापरिवारममुं सूचयितुं आर्यन् (Aryan) इति संस्कृतपदं माक्स् मुल्लर् (Max Muller) प्रभृतिभिः कैश्चित् भाषाशास्त्रज्ञैः यद्यपि पूर्वमुपयुक्तं तथापि कालान्तरे इन्डो इऱानियन् (Indo-Iranian) इति प्राचीननाम अभिधातुमेव पदमिदं केवलमुपयुज्यते।

गच्छतिकाले भाषाापरिवारस्यास्य काश्चिद्भारतीयभाषाः भूमण्डलस्य पूर्वस्यां दिशि वर्तमानेषु प्रदेशेषु काश्चिदितराः भाषाः भुवः पश्चिमप्रदेशेषु च यदा सीमाबद्धतया उपयोक्तुमारब्धाः तदा प्रभृत्येव इन्डो जर्मानिक् (Indo-Germanic) इति पृथक् नाम उत्पन्नमासीत्। केल्टिक् भाषा (Celtic) परिवारेऽस्मिन्नन्तर्भूता इत्यतः

केचिद्भाषाविद्वांसः यद्यपि परिवारस्यास्य इन्डो केल्टिक् (Indo- Celtic) इति नाम कृतवन्तः तथापि तन्न लब्धप्रचारं बभूव। यद्यपि भाषापण्डितेषु प्रभूतो विभागः इन्डो यूरोप्यन् (I.E) इति संज्ञां गोत्रसूचनायै प्रयुञ्जते तथापि जर्मन् वंशीयाः जनाः इन्डो जेर्मानिक् (Indo- Germanic) इति प्राचीने संज्ञाप्रयोगे निर्बन्धबुद्ध्या रमन्ते एव। भारते तथा यूरोप्-देशे च उपयुज्यमानाः बह्व्यः भाषाः परिवारेऽस्मिन् नान्तर्भवन्तीति हेतोः तथैव भारतात् यूरोप्देशाच्च बहिः जीवमानाभिः जनताभिः हिट्टैट् (Hittite) आद्याः भाषाः भाष्यन्ते इत्यतश्च इन्डोयूरोप्यन् (Indo- European) इति नाम युक्तिसहमिति अभिप्रायोऽप्यस्ति। तथापि भूमण्डले जनताद्वयेन बहुलतया उपयुज्यते इत्यतः इन्डोयूरोप्यन् (I.E.)इति संज्ञास्वीकारे अनौचित्यप्रसङ्गः नास्तीति ज्ञेयम्॥

## इन्डोयूरोप्यन् (I.E.) परिवारे अङ्गत्वनिर्णयाय मानदण्डाः। Criteria to determine the membership of I.E. family)

एका भाषा इन्डोयूरोप्यन् परिवारे अन्तर्भवति वा न वेति निर्णयं कर्तुम् अधोदत्ताः चतुर्विधाः मानदण्डाः उपादेयाः सन्ति। ते च यथाक्रमम्-

1) भाषायाः धातुरूपाणि प्रातिपदिकानि च इतरासां इन्डोयूरोप्यन् भाषाणां धातुभिः प्रातिपदिकैश्च सह प्रायशः समानरूपाः भवेयुः।

उदा- संस्कृतम् - bharami

ग्रीक् - phero

इङ्ग्लीष् - bear

इङ्गीष् भाषायां 'b' ग्रीक् भाषायां 'ph' इत्येतौ शब्दौ संस्कृते 'bh' इत्यस्य स्थाने उच्चारणव्यतियानैः यथाक्रमं भवन्ति।

2) नामरूपाणि, क्रियाधातवः च इतरासु इन्डोयूरोप्यन् (Indo- European) भाषासु इव समाननिरुक्तयः भवेयुः।

उदा- संस्कृतम् - asmi

ग्रीक् - esmi

3) वाक्येषु रूपविज्ञानीयानुसारं (Morphologically) लिङ्ग-पुरुष-वचन-विभक्तिपरिणामाः (Changes in gender, person, number & declensions) परिवारान्तर्गताभिः इतरभाषाभिः सदृशाः भवेयुः।

उदा - संस्कृतम् - pitaram

ग्रीक् - pitrem

4) सर्वनामशब्दाः, (pronouns) संख्यावाचकशब्दाः, (numerals) बन्धुवाचकशब्दाः (words denoting relationship) च इतरासु इन्डोयूरोप्यन् (I.E.) भाषासु इव समानाः भवेयुः ।

उदा-

| Sanskrit | Avesta | Germanic | Latin | Gothic | Slave | English |
|---|---|---|---|---|---|---|
| aham | azem | ego | ego | ik | --- | i |
| mam | Mam | Me/emi | me | mik | -- | me |
| dvau | dva | duo | duo | -- | dva | two |
| astau | asta | okto | octo | -- | aztuni | eight |
| dasa | dasa | deka | decim | -- | dezintis | ten |
| Pita | Gk-pater | Vater | Vater | -- | -- | Father |
| bhrata | Gk-phater | | frater | | | brother |

| | | | | | | |
|---|---|---|---|---|---|---|
| kah | -- | -- | quod | was | -- | who |
| hrd | -- | -- | -- | hairto | -- | heart |
| trayah | -- | -- | tres | threis | -- | three |

अथ इन्डोयूरोप्यन् (I.E.)भाषापरिवारस्य 'केन्तुम्' (Centum) 'शतम्' (Satam) इति गणद्वये विभजनं विशदयति। केन्तुम् (Centum) तथा शतम् (Satam) इति गणद्वयं परस्परमनाश्रित्य स्वतन्त्रतयैव वर्तते। तयोर्भेदनिर्वचने यत्र कुत्रापि अतिव्याप्तिरूपः (overlapping)असम्भवरूपः (neutrality) वा लक्षणदोषः नैवास्ति। प्रथमतया 1870 तमे सामान्यसंवत्सरे अस्कोलि (Ascoli) नाम इटालियन् भाषापण्डितेन व्यक्ततया निस्सन्देहं च एतादृशं गणविभजनं कृतम्। इन्डोयूरोप्यन् (I.E.) भाषासु प्रायशः क्,ख्,ग्,घ् (palatal sounds/front gutturals) इत्येते शब्दाः ये सन्ति तेषु क् इत्यस्य द्विप्रकारकः परिणामः भवति। I.E.परिवारस्य एकस्मिन् गणे सः शब्दः क् इति कण्ठस्थानीय- स्पर्शरूपेण, अन्यस्मिन् गणे श् इति तालव्यरूपेण च परिवर्तते॥

यासु भाषासु क् (front guttural) कण्ठस्थानीयरूपेण परिणामं प्राप्नोति ताः भाषाः 'केन्तुम्' (Centum) गणे इति व्यवह्रियते। तथैव च यासु भाषासु क् (front guttural) यत्र श् (sibilant) इति तालव्यरूपेण परिणामं प्राप्नोति ताः शतम् गणे च अन्तर्भवन्ति॥

यदा अस्कोलि (Ascoli) महाशयेन प्रथमतया एवं द्वौ गणौ निर्णीतौ तदा तौ यथाक्रमं पौरस्त्य क् (Eastern) पाश्चात्य क् (western) इन्डोयूरोप्यन् क् (I.E.) भाषाणां प्रातिनिध्यमावहताम् इति चिन्तापद्धतिः प्रबला आसीत्। किन्तु केन्तुम् क् (Centum) गणान्तर्गतानि हिट्टैट् क् (Hittite) तथा तोखेरियन् क् (Thokkarian) भाषयोः पुरालिखितानि यदा उपलब्धानि निर्धारितानि च तदा पौरस्त्यं पाश्चात्यं चेति पृथक्त्वकल्पना निरस्ता अभूत् । अधो दत्ता पट्टिका केन्तुम् शतम् गणयोरन्तर्भूताः भाषाः व्यक्ततया प्रदर्शयति। तद्यथा-




एवम् इन्डोयूरोप्यन् भाषापरिवारः सामान्यतया विशदीकृताः॥

## पुनरावृत्तिः (Recap)

- इन्डोयूरोप्यन् भाषापरिवारे बहवः भाषागणाः अन्तर्भवन्ति।
- आर्यन् अथवा इन्डोयूरोप्यन् भाषागणे संस्कृतम्, अवेस्तन्, प्राकृताद्याः भाषाः च अन्तर्भवन्ति।
- ग्रीक् भाषागणे इयोणिक्, आट्टिक् , फ्रेञ्च् इत्याद्याः भाषाश्च अङ्गत्वेन विभाविताः।
- जेर्मानिक् भाषागणे गोथिक्, डानिष्, स्वीडिष्, आङ्ग्लो साक्सन् इत्याद्याः भाषाः अन्तर्भविताः।

- बाल्टो स्लावोणिक्भाषागणे प्राचीनप्रष्यन्, लित्वानियन्, ऱष्यन्, लेट्टिक्, बल्ग़ियन्, स्लोवाक्यन् इ भाषाः अन्तर्भाविताः।
- केल्टिक् भाषागणे ऐरिष् स्कोट्टिष् भाषाश्च अन्तर्भाविताः दृश्यन्ते।
- हिट्टैट् भाषा प्राचीन-इन्डो यूऱोप्यन् भाषायाः सोदरी इति कश्चित् अभिप्रायः अस्ति।
- इन्डोयूऱोप्यन् भाषापरिवारस्य 'केन्तुम्' 'शतम्' इति गणद्वये विभजनं विशदयति। केन्तुम् तथा शतम् इति गणद्वयं परस्परमनाश्रित्य स्वतन्त्रतयैव वर्तते।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. संस्कृतं .......भाषागणे अन्तर्भवति। (रिक्तं पूरयत)
2. ग्रीक् भाषागणे कयोः भाषयोः अङ्गत्वेन विभाविताः।
3. ..........भाषा प्राचीन-इन्डो यूऱोप्यन् भाषायाः सोदरी इति अस्ति।(रिक्तं पूरयत)
4. इन्डोयूऱोप्यन् भाषापरिवारे अङ्गत्वनिर्णयाय मानदण्डाः कतिविधाः ?
5. इन्डोयूऱोप्यन् भाषापरिवारस्य गणद्वयं किम् ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
## (Answer the following questions in one or two sentences)

1. इन्डोयूऱोप्यन् भाषापरिवारे अङ्गत्वनिर्णयाय मानदण्डाः के ?
2. ग्रीक् भाषाविभागे काः भाषाः अन्तर्भवन्ति ?

## निर्दिष्टाभ्यासाः (Assignments)

1. इन्डोयूऱोप्यन् भाषापरिवारस्य विभजनं विशदयत।
2. इन्डोयूऱोप्यन् भाषापरिवारे अङ्गत्वनिर्णयाय मानदण्डाः के? विशदयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. आर्यन् अथवा इन्डोयूरोप्यन् ।
2. आट्टिक् , फ्रेञ्च् ।
3. हिट्टैट् ।
4. चतुर्विधाः
5. 'केन्तुम्', 'शतम्' इति ।

## सूचनाग्रन्थाः (References)


1. श्रीमन्नारायणमूर्तिः एम् , संस्कृतभाषाशास्त्रोपोद्घातः, डि.के. पब्लिकेशन्स्, दिल्ली, 1984.
2. टि. के रामचन्द्र अय्यर्, ए स्टुडन्टस् हान्टबुक्क् ओफ् कम्पारट्टीव् फिलोलजि, आर्.एस् वाध्यार् आन्ट् सन्स् , कल्पात्ति, पालक्काट्, 1987.
3. रोबिन्स् आर्. एच्. भाषाशास्त्रलघुचरित्रम् , रौट्लेट्ज्, 2013.
4. भाषाशास्त्रप्रवेशिनी, प्रोफ. आर्. एस्. वेङ्कटरामशास्त्री, कुप्पुस्वामिशास्त्रि रिसेर्च् इन्स्टिट्यूट्, चेन्नै 1996.

# Unit - 3

# इन्डोयूरोप्यन् भाषापरिवारस्य शाखाः

## उद्देश्यानि (Learning Outcomes)

- भाषाशास्त्रस्य विकासमधिकृत्य सामान्यपरिज्ञानं लभते।
- भाषाशास्त्रस्य विभिन्नान् विभागन् परिचिनोति।
- भाषाशास्त्रस्य साम्प्रदायिकपठनमधिकृत्य ज्ञानं लभते।
- इण्डे-यूरोप्यन् भाषाशाखाः जानाति।

## प्राग्व्यपेक्षाः (Prerequisites)

भाषायाः उत्पत्तिसिद्धान्तानधिकृत्य चिन्तनम्। भाषायाः उत्पत्तौ बहवः सिद्धान्ता बहुभिः उपस्थापिताः। भाषा एकस्मात् मनुष्यात् अन्यं प्रति शब्दद्वारा संप्रेष्यमाणा चिन्ता। सा मानवस्य मानसिकशारीरिकदक्षता एव। भाषाशास्त्रस्य आदिमे काले पण्डिताः प्राथमिकः शब्दः कथमुत्पन्नः इत्यस्मिन् विषये बहुधा चिन्तामकुर्वन्।भाषासिद्धान्तानधिकृत्य परिज्ञानम्। भाषाशास्त्रं नाम किमिति परिज्ञानमनिवार्यं भवति। दशासु विभागेषु वर्तमानस्य इण्डो-यूरोप्यन् भाषापरिवारस्य विविधाः शाखाः अस्मिन्नेकके परिचिनुमः।

## मुख्यपदानि (Keywords)

केल्टिक्, जर्मानिक्, इट्टालिक्, ग्रीक्, हिट्टैट्, तोखेरियन्, अल्बेनियन्, अर्मेनियन्, आर्यन् (इन्डोयूरोप्यन्), लेटो स्लाविक् अथवा बाल्टो स्लाविक्

**Discussion**

## इन्डोयूरोप्यन् भाषापरिवारस्य शाखाः (Branches of Indo-European family of Languages)

इन्डोयूरोप्यन् भाषापरिवारस्य शाखाः दशधा विभक्तुं शक्यन्ते। ताश्च यथा-

1. केल्टिक् (Keltic)
2. जर्मानिक् (Germanic or Teutonic)
3. इटालिक् (Italic)
4. ग्रीक् (Greek or Hellenic)
5. हिट्टैट् (Hittite)
6. तोखेरियन् (Tokharian)
7. अल्बेनियन् (Albanian or Illyrian)
8. लेटो स्लाविक् अथवा बाल्टो स्लाविक् (Letto- Slavic or Balto Slavic)
9. अर्मेनियन् (Armenian)
10. आर्यन् अथवा इन्डोयूरोप्यन् (Aryan or Indo- Iranian).

कैश्चिद् भाषापण्डितैः 10.a) Iranian Languages- Old Persian & Avesta (Old Iranian Languages) तथा च b) Aryan Languages of India (Vedic Sanskrit) च अवान्तरशाखारूपेण निरूपिताः उपलभ्यन्ते।

अथ एकैकामपि भाषाशाखां स्वभावनिर्देशपूर्वकं पश्यामः। एतासु शाखासु आर्यन् or Indo-Iranian, अर्मेनियन्, Lettos- Slavic or Balto- Slavic तथा अल्बेनियन् चेति चत्वारः शाखाः 'शतम्' वर्गे (Satam Group) अन्तर्भवन्ति। शाशिष्टाश्च तोखेरियन्, हिट्टैट्, ग्रीक्, इटालिक्, जर्मानिक् or Teutonic तथा केल्टिक् चेति षट् शाखाः 'केन्तुम्' वर्गे (Centum Group) च अत्र भवन्ति। अधुना तासां इन्डोयूरोप्यन् भाषाशाखानां यथाक्रमं परिचयं कुर्मः।

**1. केल्टिक् शाखा (The Keltic Branch):-**

अधुना इयं केन्तुं वर्गे अन्तर्भूता शाखा पश्चिम यूरोप् (Western European) परिमितप्रचारा एव दृश्यते। ऐरिष् (Irish) तथा वेष् (Wesh) इति भाषाद्वयमेव अस्यां शाखायामन्तर्भवति। एतासु भाषासु स्वरवर्णानां वैरल्यात् (लोपात्) बलीयान् स्पर्शप्रयत्नसम्मर्दः (Stress) दरीदृश्यते। नामविभक्तिवचनादिकम् उपसर्गविधिभिः प्रतिनिधीक्रियते।

**2. जेर्मानिक् अथवा ट्यूटोणिक् शाखा (Germanic or Teutonic Branch):-**

केन्तुं (Centum) वर्गे अन्तर्भूता इयं शाखा प्रायेण भूरिशः प्रचुरप्रचारा यतः इङ्ग्लीष् (English) भाषालोके सर्वत्र उपयुज्यते। अस्याः शाखायाः चरित्रावलोकने कृत्रिमत्वात् (synthetic) विश्लेषणात्मकः (analytic) परिणामः द्रष्टुं शक्यते। गोथिक् (Gothic), डानिष् (Danish), स्वीडिष् (Swedish), डच् (Dutch), इङ्गिलीष् (English), ऐस्लान्डिक् (Icelandic) इत्याद्याः भाषाः अस्यां शाखायामन्तर्भवन्ति। एतासु भाषासु बह्व्यः आदिमाक्षरेषु अतिसम्मर्दशालिन्यः (strong stress) एव दृश्यन्ते स्वीडिष् भाषायामेवकेवलं स्वरबलप्रकाराः (pitch accent) उपलभ्यन्ते। ग्रिम्स् नियमानुसारं (Grimms Law) व्यञ्जनानां शब्दपरिणामः एतासु भाषासु दृश्यन्ते। (Grimms Law) भाषाशास्त्रे अन्यत्र समाकलितः इत्यतः अत्र न प्रतिपाद्यते।)

**3. इटालिक् शाखा (The Italic Branch):-**

लाटिन् (Latin) भाषैव अस्यां शाखायाम् अतिप्रधाना भवति। लाटिन् भाषायाः चरित्रं रोमा साम्राज्येन (Roman Empire) नितरां बद्धो भवति। रोमा साम्राज्यस्य विनाशात् परम् इयं भाषा जनताभिः त्यक्तप्राया अभवत्। तथापि प्रत्येकं प्रत्येकं रोमा भूविभागेषु रूपान्तरेषु परिणता भाषेयं यूरोप् (Europe) भूविभागेषु इटालियन् (Italian), फ्रेञ्च् (French), स्पानिष् (Spanish), पोर्चुगीस् (Portuguese), रोमानियन् (Romanian) इत्याद्यानाम् भाषाप्ररूपाणां जननीभावेन वर्धते स्म। इयं च भाषा केन्तुं वर्गे (Centum) अन्तर्भवति॥

**4. ग्रीक् अथवा हेल्लनिक् शाखा (Greek or Hellenic Branch):-**

पुरातन ग्रीक् राष्ट्रस्य भूप्रदेशसविशेषताः राज्यतन्त्रमतभेदाश्च (Geographical & political differences) वह्वीनां देशीभाषाणाम् (dialects) उत्पत्तिहेतुभूताः आसन्। ग्रीक् भाषायाः पौराणिकरूपे संस्कृतभाषायामिव सुविशदा सुघटिता च व्याकरणपद्धतिः आसीत्। केन्तुं वर्गे अन्तर्भूतायाः ग्रीक् इति

प्राचीनतमपाश्चात्यभाषायाः (Ancient western language) तथैव प्राचीन वैदिकसंस्कृतभाषायाः (Ancient Vedic Sanskrit language) च तारतम्ये अधोनिर्दिष्टाः वस्तुताः द्रष्टुं शक्यन्ते।

ते च यथा-

**(a)** ग्रीक् भाषायाम् इन्डोयूरोप्यन् मूलभाषायामिव (parent language) स्वरविन्यासक्रमः, स्वरसन्धयः (Vowel System) चविपुलतया दृश्यते। संस्कृतभाषायां तावत् इन्डोयूरोप्यन् मूलभाषायाः व्यञ्जनाक्षराणि समग्रतया उपलभ्यन्ते च।

**(b)** उभयोरपि ग्रीक् संस्कृतभाषयोः स्वरवर्णानां क्रमप्रवृद्धा आवृत्तिः (pitch) दृश्यते।

**(c)** संस्कृते नामपदानां सर्वनामपदानां (nouns & pronouns) च सर्वविभक्तिगतानि समग्राणि रूपाणि सन्ति। किन्तु ग्रीक् भाषायां तृतीया (Instrumental), सप्तमी (Locative) इत्यादीनि परिमित विभक्तिरूपाण्येव दृश्यन्ते।

**(d)** उभयोरपि ग्रीक् संस्कृतभाषयोः बहूनि अव्ययपदानि (Indeclinables), उपसर्गाः (Prefixes), क्रियाविशेषणानि (Adverbs) च सन्ति।

**(e)** धातुव्यवस्थायां (Verbal System) परस्मैपदं (generally applied as active voice) आत्मनेपदं (generally applied as passive voice) चेति द्वैविध्यं ग्रीक् संस्कृभाषयोः समानतया वर्तन्ते। लकारव्यवस्था (Tense System) तथा निरुक्त्यनुसारं पदसंयोजनं (Derived conjugation) च संस्कृतभाषायां दृश्यते। किन्तु ग्रीक् भाषायां कृदन्ताः (Participles), तुमुन्नन्तानि (Infinitives), क्रियायाः अविरामसूचकानि (Gerunds), क्रियाधातुनिष्पन्नानि नामरूपाणि (Verbal Nouns) अतिविपुलतया सन्ति।

**(f)** उभयोरपि ग्रीक् संस्कृतभाषयोः द्विवचनरूपाणि (Dual number) नामपदेषु क्रियापदेषु च सन्ति।

**(g)** समस्तपदनिष्पत्तौ उभयोरपि भाषयोः क्षमतासादृश्यं (Similar Capacity) वर्तते॥

ग्रीक् भाषायाः अट्टिक् (Attic), डोरिक् (Doric) चेति द्वौ देशीविभागौ (Dialects) स्तः। डोरिक् (Doric) भाषा इन्डोयूरोप्यन् भाषायाः 'आ' इति ध्वनिम् आरक्ष्य वर्तते। किन्तु अट्टिक् (Attic) भाषायाम् 'आ' इत्यस्य 'ई' इति ध्वनिपरिणामः अजायत। यथा 'mater' (I.E.) इति शब्दः अट्टिक् इति देशि विभागे mater इति , डोरिक् देशीविभागे 'mater' इति च परिणतिम् आप्नोति॥

**5. हिट्टैट् शाखा (The Hittite Branch):-**

केन्तुं वर्गे (Centu group) अन्तर्भूतायाः अस्याः भाषायाः सान्निध्यसूचनाः एष्यामैनर् (Asia Minor) भूप्रदेशे अन्तर्भूतायाः अङ्कारा (Ankara) नगर्याः नवति मैल् दूरतः बागास्कुचि (Baghaskuci) देशे कृतेभ्यः उत्खननेभ्यः (Excavations) उपलब्धाः। सुमेरियन् (Sumerian) तथा अक्काडियन् (Accadian) क्यूणिफोम् (Cuneiform) लिपिविन्यासमुपयुज्य कृतानि विविधानि लिखितानि (Inscriptions) यदा पठनविषयीकृतानि तदा बैबिल् (Bible) द्वारा तथा हीब्रू (Hebrew) ग्रन्थेभ्यश्च केवलं परिचितस्य हिट्टैट् (Hittite) नरवंशमधिकृत्य चरित्ररेखाः प्रथमतया सम्प्राप्ताः भाषागवेषकैः। एतानि हिट्टैट् लिखितानि (Hittite Inscriptions) इन्डेयूरोप्यन् (I.E.) भाषागोत्रे प्रायशः प्रथमतया लिखितानि अतिपौराणिकानि इति मन्यन्ते।

**6. तोक्केरियन् शाखा (Thokkarian Branch):-**

मध्य एष्यायाः (Central Asia) टर्फान् प्रदेशे फ्रेञ्च् (French) तथा जेर्मन् (German) गवेषकैः कृतेषु पर्यवेषणेषु परिदृष्टेभ्यः बहुभ्यः भारतीयपुरालिप्या लिखितेभ्यः तालपत्रग्रन्थेभ्यः (Manuscripts) तोक्केरियन् (Thokkarian) इति इन्डोयूरोप्यन् (I.E.) शाखान्तर्भूताः काश्चन रचनाः उपलब्धाः। एतासु रचनासु निर्धारितासु सत्सु इयं केन्तुं वर्गे अन्तर्भूता कस्यां चिन्नवीनभाषायाः सूचनाः लब्धाः॥

**7. अल्बेनियन् अथवा इल्लीरियन् शाखा (Albanian or Illyrian Branch).**

इयमपि शाखा शतं वर्गे अन्तर्भूता भवति। पुरा व्यापकतया जनैः उपयुक्तायाः इल्लीरियन् (Illyrian) शाखायाः केवलमवशिष्टमेकमेव भाषारूपं भवति अल्बेनियन् (Albanian)। कानिचन पुरालिखितानि वर्जयित्वा अस्यां भाषायां न कोपि साहित्यग्रन्थः अधुना उपलभ्यते।

**8. लेटो स्लाविक् अथवा बाल्टो स्लाविक् शाखा (Letto- Slavic or Balto- Slavic).**

शतंवंशे अन्तर्भूता इयं भाषा पुरातन प्रष्यन् (Old Prussian), लित्वानियन् (Lithuanian) तथा लेट्टिक् (Lettic) भाषाभिः अधुना प्रतिनिधीक्रियते। सजीवासु इन्डोयूरोप्यन् भाषासु वैदिकसंस्कृत- (Vedic Sanskrit) पुरातन ग्रीक् (Ancient Greek) भाषयोः इव स्वरावृत्तिः (Pitch) संगीतात्मकस्वरविस्तारप्रकाराश्च (Musical Accent) दरीदृश्यन्ते।

**9. अर्मेनियन् शाखा (Armenian Branch):-**

शतंवंशे अन्तर्भूता अर्मेनियन् (Armenian) भाषा इरानियन् (Iranian) भाषातः बहून् घटकान् स्वांशीकृत्य परिपुष्टा इत्यतः सा इरानियन् (Iranian) भाषागोत्रे अन्तर्भूता इत्येवमासीत् बहुकालं यावत्

भाषाशास्त्रज्ञानां विश्वासः। पुरातनी संस्कृतभाषा भारते यथा ब्राह्मणैः तथा पुरातनी इयं भाषा (Armenian) अधुनापि अर्मेनियन् पुरोहितैः (Armenian Priests) परिपाल्यमाना वर्तते।

**10. आर्यन् अथवा इन्डो इरानियन् शाखा (Aryan or Indo- Iranian Branch):-**

पुरा आर्याः (Aryans) इति स्वयमेव विशेष्यमाणैः जनविभागैः उपयुज्यमाना भाषा आर्यन् (Aryan) इति नाम्ना तेषु जनेषु केवलं परिमिता आसीत् । शतम् भाषागणे अन्तर्भूतायामस्यां भाषायां ऋग्वेदः (Rig Veda) सेन्ड् अवेस्ता (Zend Avesta) चेति साहित्यरूपाणि रचितानि यानि इतरेभ्यः इन्डेयूरोप्यन् (I.E.) भाषाभ्यः पुरातनानि वर्तन्ते । आर्यन् (Aryan) शाखा इरानियन् (Iranian) शाखे च इन्डोयूरोप्यन् (I.E.) शाखासु परस्परं बन्धदार्ढ्यम् आवहतः॥

अलक्साण्डर् चक्रवर्तिना (Alexander- the Emperor) पेर्सेपोलिस् (Persepolis- province of Fars in Southern Iran near the modern city of Shiraz) नगरी यदा अग्निसात्कृता तदा प्रभूता इरानियन् (Iranian) दार्शनिकसाहित्यसम्पद् विनष्टा अभवत्। तस्याः साहित्यसम्पदः अवशिष्टग्रन्थाः अधुना अवेस्ता (Avesta) अथवा सेन्ड् (Zend) नाम्ना सोरतुष्ट्राणां (Zoroastrians) विशुद्धग्रन्थाः इति परिगणनया संरक्षिताः। पुरातन इरानियन् देशीभाषासु (Old Iranian Dialects) रचितानि कानिचन लिखितान च सुरक्षितानि वर्तन्ते। बेहिस्तुन् शिलोच्चये (Mount Behistun- Kermanshah province of Iran) दृष्टं किञ्चदपि प्रधानं शिलालिखितं डारियस् (Darius- The most powerful ruler of Persia, B.C.E. 486 to 550) नाम्नः राज्ञः शासनमिति प्रसिद्धं भवति। तत्र प्रयुक्ता देशीभाषा पुरातन इरानियन् (Old Iranian) भवति। अतिप्राचीनाः ईदृश्यः भारतीयरेखाः (Indian Records) वेदाः एव। ते च इन्डोयूरोफ्यन् (I.E.) परिवारे अतिप्रधानाः साहित्यग्रन्थाः इति गण्यन्ते। दार्दी (Dardic- related to Kashmiri dialects) इति भाषा इरानियन् (Iranian) इन्ड्यन् (Indian) भाषयोः मध्यवर्तिनी चास्ति॥

**10.(a). इरानियन्शाखा (Iranian Branch):-**

पुरातनपारसीकं (Old Persian), अवेस्ता (Avesta) च पौराणिक- इरानियन् भाषे भवतः। पुरातपारसीकभाषा (Old Persian Language) क्यूणीफोम् (Cuneiform) लिखितेषु बहुषु उपलभ्यते। अवेस्ता (Avesta) भाषा चाधुना केषुचित् दार्शनिकग्रन्थानाम् अवशिष्टेष्वेव दृश्यन्ते। अवेस्ताभाषायाः ऋग्वेदभाषया बहूनि सादृश्यानि सन्ति। सामान्यसंवत्सर पूर्वं (B.C.E.) द्वितीयसहस्राब्दे विभक्ते एते अवेस्ता- ऋग्वेदभाषेसजातीये इति कल्प्येते।

सेमिटिक् (Semitic) पदजालैः मिश्रीभूता पह्लवी (Pahlavi) भाषा मध्यइऱानियन् (Middle Iranian) भाषासु प्रमुखा भवति। आधुनिक इऱानियन् (Modern Iranian) भाषासु प्रमुखा भवति पारसीकभाषा (Persian) अथवा इऱानी (Irani Language)। अस्मिन् भाषाविभागे अफ्गान् (Afghan), कुर्दिस्थान् (Kurdistan) च प्रमुखे भवतः। आधुनिकभारतीयदेशीभाषाः (Modern Indian Vernaculars) यथा वैदिकसंस्कृतेन (Vedic Sanskrit) पाली- प्राकृतादिभ्यश्च (Pali, Prakrit etc.) नितरां सम्बद्धाः तथैव इऱानियन् (Iranian) भाषाश्च परस्परमाबद्धाः वर्तन्ते।

**10. (b). भारतीय- आर्यन् भाषाः (Aryan Languages of India)**

भारतीय- आर्यन् भाषाशाखायां (Aryan branch of Indian Languages) वैदिकसंस्कृतं (Vedic Sanskrit) पौराणिकतमं भवति। वैदिकसंस्कृतभाषा इन्डोयूरोप्यन् शाखायाः आदिमसविशेषताः वहति। वैदिकसंस्कृतभाषा पुरातन- इन्डोयूरोप्यन् (Ancient Indo- European) भाषाणां व्यञ्जनाक्षरव्यवस्थाभिः (Consonant System) सदृशा भवत्यपि स्वरवर्णव्यवस्थासु (Vowel System) परिणतिमावहति। वैदिकसंस्कृतभाषा आधुनिकसंस्कृतभाषातः क्रियाधातूनमाधिक्येन स्वरशास्त्रस्य वैविध्येन च पृथगवगम्यते॥

प्राकृतं, पाली च (Prakrit & Pali) अनुष्ठानक्रमनिवृत्यर्थं साहित्यरचनार्थं च आधुनिकसंस्कृतेन सहैव उपयुज्यमाना आसीत्। पालीभाषा श्रीबुद्धस्य धार्मिकोपदेशप्रचारणार्थं साहित्यभाषारूपेण प्रसृता आसीत्। महाराष्ट्री (Maharashtri), शौरसेनी (Sauraseni), मागधी (Magdhi), अर्धमागधी (Ardha Magadhi), पैशाची (Paisachi) तथा पाली (Pali) च प्रमुखाः प्राकृतभाषाः भवन्ति। आधुनिकमऱाठी (Modern Maratti) प्राकृतभाषातः; गुजऱाती (Gujarathi), राजस्थानी (Rajasthani), पञ्चाबी (Panjabi), पश्चिमी हिन्दी (Western Hindi), शौरसेनी भाषातः; पौरस्त्या हिन्दी (Eastern Hindi) अर्धमागध्याः, बंगाली (Bengali), ओरिया Oria), बिहारी (Bihari), आसामीस् (Assamis) च मागधीभाषातः (From Magdhi), काश्मीरी (Kashmiri), पैशाचीभाषातः (Pasachi) तथा नेपाली (Nepali) हिमालयीय देशाभाषाश्च पैशाच्याः संजाताः इति ज्ञेयम्।

## पुनरावृत्तिः (Recap)

- इन्डोयूरोप्यन् भाषापरिवारस्य शाखाः दशधा विभक्तुं शक्यन्ते।
- केल्टिक्, जर्मानिक्, इटालिक्, ग्रीक्, हिट्टैट्, तोखेरियन्, अल्बेनियन्, अर्मेनियन्, आर्यन् (इन्डोयूरोप्यन्),Letto- Slavic or Balto Slavic,
- 'केन्तु' वर्गे अन्तर्भूतायाः अस्याः भाषायाः सान्निध्यसूचनाः एष्यामैनर् (Asia Minor) भूप्रदेशे अन्तर्भूतायाः अङ्कारा (Ankara) नगर्याः नवति मैल् दूरतः बागास्कुचि (Baghaskuci) देशे कृतेभ्यः उत्खननेभ्यः (Excavations) उपलब्धाः।
- 'शतम्' भाषागणे अन्तर्भूतायामस्यां भाषायां ऋग्वेदः (Rig Veda) सेन्ड् अवेस्ता (Zend Avesta) चेति साहित्यरूपाणि रचितानि यानि इतरेभ्यः इन्डेयूरोप्यन् (I.E.) भाषाभ्यः पुरातनानि वर्तन्ते।
- भारतीय- आर्यन् भाषाशाखायां वैदिकसंस्कृतं (Vedic Sanskrit) पौराणिकतमं भवति। वैदिकसंस्कृतभाषा इन्डोयूरोप्यन् शाखायाः आदिमसविशेषताः वहति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. ऐरिष् तथा वेष् इति भाषाद्वयमेव ............ शाखायामन्तर्भवति। (रिक्तं पूरयत)
2. लाटिन् भाषैव......... शाखायाम् अतिप्रधाना भवति। (रिक्तं पूरयत)
3. इन्डोयूरोप्यन् भाषापरिवारे कति शाखाः सन्ति ?
4. अट्टिक् भाषायाम् 'आ' इत्यस्य 'ई' इति......... अजायत ।(रिक्तं पूरयत)

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
(Answer the following questions in one or two sentences)

1. इन्डोयूरोप्यन् परिवारे अन्तर्भवति वा न वेति निर्णयाः चतुर्विधाः मानदण्डाः के?

2. 'शतम्' वर्गे काः भाषाः अन्तर्भवन्ति?
3. 'केन्तुम्' वर्गे काः भाषाः अन्तर्भवन्ति ?

## एकैकया खण्डिकया उत्तरं लिखत।
## (Answer the following questions in a paragraph)

1. केल्टिक् शाखां विशदयत।
2. जेर्मानिक् अथवा ट्यूटोणिक् शाखां विशदयत।
3. इटालिक् शाखां विशदयत।
4. हिट्टैट् शाखां विशदयत।
5. तोक्केरियन् शाखां विशदयत।
6. अल्बेनियन् अथवा इल्लीरियन् शाखां विशदयत।
7. लेटो स्लाविक् अथवा बाल्टो स्लाविक् शाखां विशदयत।
8. अर्मेनियन् शाखां विशदयत।

## निर्दिष्टाभ्यासाः (Assignments)

1. आर्यन् अथवा इन्डो इरानियन् शाखां विशदयत।
2. ग्रीक् अथवा हेल्लनिक् शाखां विशदयत
3. 'शतम्' वर्गे अन्तर्भूतायां भाषायां प्रतिपादयत।
4. केन्तुं वर्गे अन्तर्भूतायां भाषायां प्रतिपादयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. केल्टिक् शाखा

2. इटालिक्
3. दशधा
4. ध्वनिपरिणामः

## सूचनाग्रन्थाः (References)


1. श्रीमन्नारायणमूर्तिः एम् , संस्कृतभाषाशास्त्रोपोद्धातः, डि.के. पब्लिकेशन्स्, दिल्ली, 1984.
2. टि. के रामचन्द्र अय्यर्, ए स्टुडन्टस् हान्टबुक्क् ओफ् कम्पारट्टीव् फिलोलजि, आर्.एस् वाध्यार् आन्ट् सन्स् , कल्पात्ति, पालक्काट्, 1987.
3. रोबिन्स् आर्. एच्. भाषाशास्त्रलघुचरित्रम् , रौट्लेट्ज्, 2013.
4. भाषाशास्त्रप्रवेशिनी, प्रोफ. आर्. एस्. वेङ्कटरामशास्त्री, कुप्पुस्वामिशास्त्रि रिसेर्च् इन्स्टिट्यूट्, चेन्नै 1996.

# Unit- 4

# इन्डोयूरोप्यन् भाषापरिवारस्य विशेषगुणाः

## उद्देश्यानि (Learning Outcomes)

- भाषाशास्त्रस्य विकासमधिकृत्य सामान्यपरिज्ञानं लभते।
- भाषाशास्त्रस्य विभिन्नाः विभागाः ज्ञायते।
- भाषाशास्त्रस्य साम्प्रदायिकपठनमधिकृत्य ज्ञानं लभते।

## प्राग्व्यपेक्षाः (Pre requisites)

भाषायाः उत्पत्तिसिद्धान्तानधिकृत्य चिन्तनम्। भाषायाः उत्पत्तौ बहवः सिद्धान्ता बहुभिः उपस्थापिताः। भाषा विशेषेण एकस्मात् मनुष्यात् अन्यं प्रति शब्दद्वारा संप्रेष्यमाणा चिन्ता। सा मानवस्य मानसिकशारीरिकदक्षता एव। भाषाशास्त्रस्य आदिमे काले पण्डिताः प्राथमिकः शब्दः कथमुत्पन्नः इत्यस्मिन् विषये बहुधा चिन्तामकुर्वन्।भाषासिद्धान्तानधिकृत्य परिज्ञानम्। भाषाशास्त्रं नाम किमिति परिज्ञानमनिवार्यं भवति।

## मुख्यविषयाः (Keywords)

इन्डो-यूरोप्यन्, अर्थव्यञ्जनक्षमता, कृत् प्रत्ययैः, तद्धित प्रत्ययैः, धातवः पदनिष्पत्तिक्षमाः, सुप् प्रत्ययनिबद्धाः विभक्त्यर्थबोधकाः, तिङ् प्रत्ययनिबद्धाः, क्रियापदानां पुरुष- वचन- आत्मनेपदि- परस्मैपदिसूचकाः,

**Discussions**

## इन्डोयूरोप्यन् भाषापरिवारस्य विशेषगुणाः। (Peculiar Characteristics of I.E. family of Languages)

इन्डोयूरोप्यन् भाषापरिवारस्य (I.E. family) षट् विशेषगुणाः (Peculiar Characteristics) सामान्यतया सन्ति। ते च यथाक्रमं-

**1. अन्त्यप्रत्ययवक्रता (Suffix Inflexion)**

इन्डो-यूरोप्यन् (I.E.) भाषाशाखासु इयं प्रत्ययवक्रता पदानुरूपम् अर्थानुरूपं चेति द्विधा उत्पत्तिकालादारभ्यैव दृश्यते। एते प्रत्ययाः स्वभावतः स्वतन्त्राः एवासन् किन्तु कालान्तरे स्वरोच्चारणवैविध्यानुसारं हेत्वन्तरापेक्षया च केवलाक्षरपदवीं प्राप्ताः। एवं पदान्तरैः सह स्थित्वैव एतेषाम् अर्थव्यञ्जनक्षमता लभ्यते, न तु स्वतन्त्रतया अर्थबोधकाः भवन्ति। कथमिति चेत् भूरिशः प्राचीन इन्डो-यूरोप्यन् (Ancient Indo- European) भाषाभ्यः द्विवचनप्रत्ययाः केचित् विभक्त्यन्तप्रत्ययाश्च विनष्टाः। इङ्गलीष् भाषायां बहुवचनान्तप्रत्ययवर्जं ( except s), तच्छब्दपुल्लिंगे (Third person masculine) द्वितीया- षष्ठी एकवचन- (Accusative & locative singular) प्रत्ययवर्जं (except him & his) बहवः अन्त्यप्रत्ययाः विनष्टाः दृश्यन्ते।

**2. प्राचीन इन्डो- यूरोप्यन् (Primitive I.E.)**

भाषाधातूनां प्रायशः एकाक्षरात्मकत्वम्। (Monosyllabic nature of most of the Primitive I. E. Languages)

अन्त्यप्रत्ययानि विना इन्डो यूरोप्यन् एकाक्षरात्मकभाषाधातूनां स्वतन्त्रतया स्थितिर्नास्ति। "न केवलं प्रकृतिः प्रयोक्तव्या न च केवलाः प्रत्ययाः" इति व्याकरणमहाभाष्यकारेण पतञ्जलिमहर्षिणा उक्तमेवात्र प्रमाणम्। मानवानां बहुविधाः चिन्ताः प्रकटयितुं बहवः प्रत्ययाः आविष्कृताः। अत्र एकात्क्षरात्मकाः धातवः कृत् प्रत्ययैः (Primary suffixes) तद्धित प्रत्ययैश्च (Secondary suffixes) घटिताः सार्थकपदरूपेण परिणामं लभन्ते। तद्धितप्रत्यनिबद्धाः धातवः पदनिष्पत्तिक्षमाः, सुप् प्रत्ययनिबद्धाः विभक्त्यर्थबोधकाः, तिङ् प्रत्ययनिबद्धाः क्रियापदानां पुरुष- वचन- आत्मनेपदि- परस्मैपदिसूचकाश्च भवन्ति।

**3. उपसर्गानां वाक्यघटनायां स्वाधीनतायाः अभावः- (Absence of syntactical prefixes)**

संस्कृते ये उपसर्गाः (Prefixes) तथा ग्रीक् (Greek), लाटिन् (Latin), जेर्मानिक् (Germanic) भाषासु ये धातुघटिताः उपसर्गाश्च सन्ति ते धात्वर्थप्रकारानैव परिष्कुर्वन्ति, नैव वाक्यघटनाम् । संस्कृतेप्रादिसमासाः (Pradisamasah), नञ् समासाः (nanj samasah), भूतकालद्योतकः (denoting past tense) अ- भवत् (a- bhavat) इत्यादयश्च अस्योदाहरणानि भवन्ति। उपसर्गाणां धातूनां च केवलसंयोजनमेवात्र भवति। वैदिकपदेषु दृष्टेभ्यः- आ देवो याति,आ सत्येन रजसा वर्तमाना - इत्यादिभ्यः उपसर्गान् अर्थहानिं विना अर्थपरिणामं विना च विभक्तुं विहातुं च शक्यते। एवम् उपसर्गाणां वाक्यघटनासु अनपेक्षणीयता वा अभावो वा द्रष्टुं शक्यते॥

**4. धातूनां पदानां च आवृत्तिः- (Reduplication of words)**

अर्थव्यक्त्यै विभिन्नार्थद्योतनाय वा धातूनां पदानां पदभागानां वा आवृत्तिः (Reduplication) इन्डो यूरोप्यन् (I.E.)भाषासु सुसाध्या भवति। संस्कृतमहाकाव्येषु यमकानुप्रासादि शब्दालङ्कारेषु इयं द्रष्टुं शक्यते।

**5. दीर्घदीर्घसमस्तपदनिर्मितिक्षमता - (Power of making long-long compounds)**

सुदीर्घसमस्पतदनिर्माणक्षमता इन्डो यूरोप्यन् (I.E.)भाषाणां सविशेषता भवति। अत्र समस्तपदानि वाक्यघटनां व्यक्ततया प्रतिपादयन्ति। एतादृशेषु समस्तपदेषु मध्यगताः प्रत्ययाः यद्यपि लुप्ताः तथापि समग्रं वाक्यार्थं बोधयन्ति। यहूदी अथवा सेमिटिक् (Semitic)भाषासु इव केवलं पदयोजनमत्र न भवति,किन्तु घटकपदानि एकस्मिन्नेकके तथा सुबद्धाः यथा तानि सविशेषमेकमर्थमाविष्कुर्वन्ति। पदानां विभज्य अर्थकल्पने तादृशी सविशेषता मनोहारिता वा नोपलभ्यते। सुबन्धु- बाणभट्ट- दण्डीप्रभृतीनां काव्येषु दीर्घसमस्तपदानां सौभगं नितरामास्वाद्यतरं विभाति॥

**6. स्वरविपर्ययः- (Vowel Variation or Vowel Gradation)**

धातुरूपेषु पदविभागेषु च स्वरविपर्ययः अथवा स्वस्ववर्णानामुच्चारणपरिणामः इन्डो यूरोप्यन् (I.E.)भाषासु सुलभतया दृश्यते। तथापि सेमिटिक् भाषास्विव स्वरविपर्ययः सदा अनिवार्यो न भवति। इन्डो यूरोप्यन् (I.E.)भाषासु यः स्वरपरिणामः दृश्यते सः उच्चारणव्यवस्थानुरूपमेव (Accentuation System) जायते। अन्त्यप्रत्ययानां लोपः प्रायशः स्वस्ववर्णपरिणामैरेव सूच्यते॥

## पुनरावृत्तिः (Recap)

- इन्डोयूरोप्यन्  (I.E.) भाषाशाखासु इयं प्रत्ययवक्रता पदानुरूपम् अर्थानुरूपं चेति द्विधा उत्पत्तिकालादारभ्यैव दृश्यते।
- कथमिति चेत् भूरिशः प्राचीन इन्डो यूरोप्यन्  भाषाभ्यः द्विवचनप्रत्ययाः केचित् विभक्त्यन्तप्रत्ययाश्च विनष्टाः। इङ्ग्लीष् भाषायां बहुवचनान्तप्रत्ययवर्जं (excepts), तच्छब्दपुल्लिंगे (Third person masculine) द्वितीया- षष्ठी एकवचन- (Accusative & locative singular) प्रत्ययवर्जं (except him & his) बहवः अन्त्यप्रत्ययाः विनष्टाः दृश्यन्ते।
- प्राचीनइन्डो यूरोप्यन् भाषाधातूनां प्रायशः एकाक्षरात्मकत्वम्। (Monosyllabic nature of most of the Primitive I. E. Languages)-
- अत्र एकात्क्षरात्मकाः धातवः कृत् प्रत्ययैः (Primary suffixes) तद्धित प्रत्ययैश्च (Secondary suffixes)घटिताः सार्थकपदरूपेण परिणामं लभन्ते । तद्धितप्रत्यनिबद्धाः धातवः पदनिष्पत्तिक्षमाः, सुप् प्रत्ययनिबद्धाः विभक्त्यर्थबोधकाः, तिङ् प्रत्ययनिबद्धाः क्रियापदानां पुरुष- वचन- आत्मनेपदि- परस्मैपदिसूचकाश्च भवन्ति।
- उपसर्गानां वाक्यघटनायां स्वाधीनतायाः अभावः (Absence of syntactical prefixes)-
- संस्कृतेप्रादिसमासाः (Pradisamasah), नञ् समासाः (nanj samasah), भूतकालद्योतकः (denoting past tense) अ- भवत् (a- bhavat) इत्यादयश्च अस्योदाहरणानि भवन्ति।
- धातूनां पदानां च आवृत्तिः (Reduplication of words)-
- अर्थव्यक्त्यै विभिन्नार्थद्योतनाय वा धातूनां पदानां पदभागानां वा आवृत्तिः (Reduplication) इन्डो यूरोप्यन् (I.E.)भाषासु सुसाध्या भवति।
- सुदीर्घसमस्पतदनिर्माणक्षमता इन्डो यूरोप्यन् (I.E.)भाषाणां सविशेषता भवति । अत्र समस्तपदानि वाक्यघटनां व्यक्ततया प्रतिपादयन्ति।
- धातुरूपेषु पदविभागेषु च स्वरविपर्ययः अथवा स्वस्ववर्णानामुच्चारणपरिणामः इन्डो यूरोप्यन् (I.E.)भाषासु सुलभतया दृश्यते।

**वस्तुनिष्ठप्रश्नाः (Answer to Objective type questions)**

1. …………विना इन्डो यूरोप्यन् एकाक्षरात्मकभाषाधातूनां स्वतन्त्रतया स्थितिर्नास्ति ।(रिक्तं पूरयत)
2. इन्डोयूरोप्यन् भाषापरिवारे कति विशेषगुणाः?
3. इन्डो-यूरोप्यन् भाषाशाखासु प्रत्ययवक्रता कतिविधम् के च ते?
4. "न केवलं प्रकृतिः प्रयोक्तव्या न च केवलाः प्रत्ययाः" इति प्रमाणं कः उक्तः?

**एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।**
**(Answer the following questions in one or two sentences)**

1. उपसर्गानां वाक्यघटनायां स्वाधीनतायाः अभावाः उदाहरणानि कानि?

**निर्दिष्टाभ्यासाः (Assignments)**

1. इन्डोयूरोप्यन् भाषापरिवारस्य विशेषगुणाः विशदयत।

**वस्तुनिष्टप्रश्नानाम् उत्तराणि (Answer to Objective type questions)**

1. अन्त्यप्रत्ययानि।
2. षट्।
3. द्विधा, पदानुरूपम् अर्थानुरूपं चेति।
4. व्याकरणमहाभाष्यकारेण पतञ्जलिमहर्षिणा

**सूचनाग्रन्थाः (References)**


1. श्रीमन्नारायणमूर्तिः एम् , संस्कृतभाषाशास्त्रोपोद्घातः, डि.के. पब्लिकेशन्स्, दिल्ली, 1984.

2. टि. के रामचन्द्र अय्यर्, ए स्टुडन्टस् हान्टबुक्क् ओफ् कम्पारट्टीव् फिलोलजि, आर्.एस् वाध्यार् आन्ट् सन्स् , कल्पात्ति, पालक्काट्, 1987.
3. रोबिन्स् आर्. एच्. भाषाशास्त्रलघुचरित्रम् , रौट्लेट्ज्, 2013.
4. भाषाशास्त्रप्रवेशिनी, प्रोफ. आर्. एस्. वेङ्कटरामशास्त्री, कुप्पुस्वामिशास्त्रि रिसेर्च् इन्स्टिट्यूट्, चेन्नै 1996.

# BLOCK-4

# ध्वनिचर्चा

SGOU

# Unit - 1
# उच्चारणावयवाः

## उद्देश्यानि (Learning Outcomes)

- भाषाशास्त्रस्य विकासमधिकृत्य सामान्यपरिज्ञानम्।
- भाषाशास्त्रस्य विभिन्नान् विभागान् जानाति।
- भाषाशास्त्रस्य साम्प्रदायिकपठनमधिकृत्य ज्ञानम्।
- स्वराणां वैविध्यं, यत्नानां वैविध्यं, उत्पत्तिस्थानानां वैविध्यं च जायते।

## प्राग्व्यपेक्षाः (Prerequisites)

भाषायाः उत्पत्तिसिद्धान्तानधिकृत्य चिन्तनम्। भाषायाः उत्पत्तौ बहवः सिद्धान्ता बहुभिः उपस्थापिताः। भाषा विशेषेण एकस्मात् मनुष्यात् अन्यं प्रति शब्दद्वारा संप्रेष्यमाणा चिन्ता। सा मानवस्य मानसिकशारीरिकदक्षता एव। भाषाशास्त्रस्य आदिमे काले पण्डिताः प्राथमिकः शब्दः कथमुत्पन्नः इत्यस्मिन् विषये बहुधा चिन्तामकुर्वन्। भाषासिद्धान्तानधिकृत्य परिज्ञानम्। भाषाशास्त्रं नाम किमिति परिज्ञानमनिवार्यं भवति।

ध्वनिचर्चा नामके अस्मिन्नेकके ध्वनिनिष्पत्तिसहायकानाम् अवयवानां, शब्दोच्चारणप्रकाराणां, संस्कृते विद्यमानानां स्वरवर्णानां तथा स्वरविचारस्य च प्रतिपादनं क्रियते। तत्र स्वरवर्णानां व्यञ्जनवर्णानां च उत्पत्तौ हेतुभूताः अवयवाः आवश्यकाः प्रयत्नाः च परामर्शयोग्याः भवन्ति। तथैव स्वराणां वैविध्यं, यत्नानां वैविध्यं, उत्पत्तिस्थानानां वैविध्यं च प्रतिपाद्यानि सन्ति।

## मुख्यविषयाः (Keywords)

ध्वनिचर्चा, शब्दोच्चारणप्रकाराणान्, स्वरवर्णानान्, उच्चारणावयवान्, शब्दोच्चारणं, स्वरूपनिरूपणम्।

## Discussions

आमुखम्-

ध्वनिचर्चा नामके अस्मिन्नेकके ध्वनिनिष्पत्तिसहायकानाम् अवयवानां, शब्दोच्चारणप्रकाराणां, संस्कृते विद्यमानानां स्वरवर्णानां तथा स्वरविचारस्य च प्रतिपादनं क्रियते। ध्वनिर्नाम शबदस्यापरपर्यायः। शब्दानाञ्च स्वरव्यञ्जनाक्षरात्मकता च नियामिका भवति। तत्र स्वरवर्णानां व्यञ्जनवर्णानां च उत्पत्तौ हेतुभूताः अवयवाः आवश्यकाः प्रयत्नाः च परामर्शयोग्याः भवन्ति। तथैव स्वराणां वैविध्यं, यत्नानां वैविध्यं, उत्पत्तिस्थानानां वैविध्यं च प्रतिपाद्यानि सन्ति। प्रथमम् उच्चारणावयवाः, ततः शब्दोच्चारणं, ततः अचां हलां च स्वरूपनिरूपणं, पुनः स्वरविचारश्च क्रियते॥

### 1. उच्चारणावयवाः - (The Organs of Speech)

पौराणिकैः वैयाकरणैः भाषायां प्रयुक्तानां सर्वेषामपि वर्णानाम् उच्चारणे सहायकाः अवयवाः अधोक्तरीत्या निर्दिष्टाः। तद्यथा -

* "अकुहविसर्जनीयानां कण्ठः"।

अ इति अकारः तद्भेदाश्च। कु इत् कवर्गे अन्तर्भूतं क,ख,ग,घ,ङ इति व्यञ्जनपञ्चकम्। (कु इति उदित्)। उदित् इति ह्रस्वोकारः यस्मिन् इत् रूपेण वर्तते इत्। चु इति उदित् चवर्गं, टु इत् उदित् टवर्गं, तु इति उदित् तवर्गं, पु इति उदित् पवर्गं च सूचयति। कुचुटुतुपु- एते उदितः इति उक्तं च। विसर्जनायम् इत्यस्य विसर्गः ( : ) इत्यर्थः। एवम् अकारस्य, कवर्गाक्षराणां, विसर्गस्य च उच्चारणावयवः कण्ठः इति ज्ञातव्यः। अथवा अकारः, तद्भेदाः, कवर्गः, विसर्गश्च कण्ठस्थानीयाः इति।

* "इचुयशानां तालु" -

इकारस्य, च,छ,ज,झ,ञ (चु) इत्येतेषां य,श इत्येतयोश्च उच्चारणावयवौ तालू इति।

* "ऋटुरषाणां मूर्धा" -

ऋकारस्य, ट,ठ,ड,ढ,ण (टु) इत्येतेषां र,ष इत्येतयोश्च उच्चारणावयवः मूर्धा इति।

* "ऌतुलसानां दन्ताः" -

ऌकारस्य, त,थ,द,ध,न (तु) इत्येतेषां, ल,स इत्येतयोश्च उच्चारणावयवाः दन्ताः इति।

* "उपूपध्मानीयानामोष्ठौ" -

उकारस्य, प,फ,ब,भ,म (पु) इत्येतेषां,उपध्मानीययोः (-प,-फ) च उच्चारणावयवौ ओष्ठौ इति।

* “ञमङणनानां नासिका च” -

वर्गपञ्चमानां ञ,म,ङ,ण,न इत्येतेषाम् उच्चारणावयवः वर्गस्थानेन सह नासिका च इति।

* “एदैतोः कण्ठतालू” -

एकारस्य ऐकारस्य च उच्चारणावयवौ कण्ठतालू इति।

* “ओदौतोः कण्ठोष्ठम्” -

ओकारस्य औकारस्य च उच्चारणावयवौ कण्ठोष्ठौ च इत्।

वकारस्य दन्तोष्ठम् -

वकारस्य उच्चारणावयवौ दन्तोष्ठौ चेति।

* “जिह्वामूलीयस्य जिह्वामूलम्” -

जिह्वामूलीस्य (-क,-ख) उच्चारणावयवः जिह्वामूलं चेति।

* “नासिका अनुस्वारस्य” -

अनुस्वारस्य (म्) उच्चारणावयवः नासिका चेति।

** टिप्पणीः - एत्,ऐत्,ओत्,औत् इति सर्वत्र त् इति परं दृश्यते। अयमेव तपरः इत्युच्यते। त् इति येषां स्वराणां परतः वर्तते तेषां स्वराणां तत्कालग्रहणं करणीयमित्यर्थः।

एवम् अत्- अ,आत्- आ इत्यादि।

प,फ इत्येतयोः प्राक् ये अर्धविसर्गसदृशे उच्चारणे श्रूयते ते एव उपध्मानीयसंज्ञया सूच्येते।

क,ख इत्येतयोः प्राक् ये अर्धविसर्गसदृशे उच्चारणे श्रूयते ते एव जिह्वामूलीयसंज्ञया सूच्येते।

* अधोदत्ता पट्टिका उच्चारणावयवान् (वर्णोद्भवस्थानानि) विशदयति -

| **स्थानानि** | **अक्षराणि** |
|---|---|
| कण्ठः | अ, क,ख,ग,ध,ङ,ह, :(विसर्गः) |
| तालु | इ, च,छ,ज,झ,ञ,य,श |
| मूर्धा | ऋ,ट,ठ,ड,ढ,ण,र,ष |
| दन्ताः | ऌ, त,थ,द,ध,न,ल,स |

| | |
|---|---|
| ओष्ठौ | उ,प,फ,ब,भ,म, ⨯ प, ⨯फ |
| नासिका | ञ,म,ङ,ण,न,अनुस्वारः(म्) |
| कण्डतालु | ए,ऐ |
| कण्ठोष्ठम् | ओ,औ |
| दन्तेषोठम् | व |
| जिह्वामूलीयम् | ⨯प, ⨯फ |
| उपध्मानीयम् | ⨯क, ⨯ ख |

## पुनरावृत्तिः (Recap)

- अकुहविसर्जनायानां कण्ठः।
- इचुयशानां तालुः।
- ऋटुरषाणां मूर्धा।
- लृतुलसानां दन्ताः।
- उपूपध्मानीयानामोष्ठौ।
- ञमङणनानां नासिका।
- एदैतोः कण्ठतालू।
- ओदौतोः कण्ठोष्ठम्।
- नासिका अनुस्वारस्य।
- जिह्वामूलीयस्य जिह्वामूलम्।

## वस्तुनिष्ठप्रश्नाः (Answer to Objective type questions)

1. शब्दस्यापरपर्यायः नाम किम्?

2. विसर्गस्य उच्चारणावयवः किम् ?

3. ऋकारस्य उच्चारणावयवः किम् ?

4. उपध्मानीययोः ( ᳵप, ᳵफ) उच्चारणावयवौ ........इति।

5. अनुस्वारस्य (म्) उच्चारणावयवः किम् ?

## एकैकया खण्डिकया उत्तरं लिखत।
(Answer the following questions in a paragraph)

उच्चारणावयवाः विशदयत।

## निर्दिष्टाभ्यासाः (Assignments)

उच्चारणावयवान् विशदयत।

## वस्तुनिष्टप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. ध्वनिः
2. कण्ठः
3. मूर्धा
4. ओष्ठौ
5. नासिका

## सूचनाग्रन्थाः (References)

1. श्रीमन्नारायणमूर्तिः एम् , संस्कृतभाषाशास्त्रोपोद्घातः, डि.के. पब्लिकेशन्स्, दिल्ली, 1984.

2. टि. के रामचन्द्र अय्यर्, ए  स्टुडन्टस् हान्टबुक्क् ओफ् कम्पारट्टीव् फिलोलजि, आर्.एस् वाध्यार् आन्ट् सन्स् , कल्पात्ति, पालक्काट्, 1987.

3. रोबिन्स् आर्. एच्. भाषाशास्त्रलघुचरित्रम् , रौट्लेट्ज्, 2013.

4. भाषाशास्त्रप्रवेशिनी, प्रोफ. आर्. एस्. वेङ्कटरामशास्त्री, कुप्पुस्वामिशास्त्रि रिसेर्च् इन्स्टिट्यूट्, चेन्नै 1996

SGOU

# Unit - 2
# शब्दोच्चारणम्

## उद्देश्यानि (Learning Outcomes)

- भाषाशास्त्रस्य विकासमधिकृत्य सामान्यपरिज्ञानम्।
- भाषाशास्त्रस्य विभिन्नाः विभागाः।
- भाषाशास्त्रस्य साम्प्रदायिकपठनमधिकृत्य ज्ञानम्।
- स्वराणां वैविध्यं, यत्नानां वैविध्यं, उत्पत्तिस्थानानां वैविध्यं च ज्ञायन्ते।
- प्रयत्नभेदान् स्पष्टयति।

## प्राग्व्यपेक्षाः (Prerequisites)

अस्मिन्नेकके ध्वनिनिष्पत्तिसहायकानाम् अवयवानां, शब्दोच्चारणप्रकाराणां, संस्कृते विद्यमानानां स्वरवर्णानां तथा स्वरविचारस्य च प्रतिपादनं क्रियते। तत्र स्वरवर्णानां व्यञ्जनवर्णानां च उत्पत्तौ हेतुभूताः अवयवाः आवश्यकाः प्रयत्नाः च परामर्शयोग्याः भवन्ति। तथैव स्वराणां वैविध्यं, यत्नानां वैविध्यं, उत्पत्तिस्थानानां वैविध्यं च प्रतिपाद्यानि सन्ति। अस्मिन्नेकके प्रयत्न

## मुख्यविषयाः (Keywords)

आभ्यन्तरः, बाह्यः, आभ्यन्तरप्रयत्नः- स्पृष्टम्, ईषत्स्पृष्टम्, ईषद्विवृतं, विवृतं, संवृतम्,बाह्यप्रयत्नाः, विवारः, संवारः,श्वासः,नादादिः।

## Discussions

### शब्दोच्चारणे प्रयत्नाः।

शब्दोच्चारणावयवानां प्रतिपादनानन्तरं शब्दोच्चारणे आवश्यकान् प्रयत्नान् विशदयति । तद्यथा पाणिनिना उक्तम् - यत्नाः द्विधा, आभ्यन्तरो बाह्यश्च इति । आद्यः आभ्यन्तरप्रयत्नः स्पृष्टम्, ईषत्स्पृष्टम्, ईषद्विवृतं, विवृतं, संवृतम् इति पञ्चधा। द्वितीयः बाह्यप्रयत्नः विवारः, संवारः, श्वासः, नादः, घोषः, अघोषः,अल्पप्राणः, महाप्राणः, उदात्तः, अनुदात्तः, स्वरितः चेति एकादशप्रकारः। आभ्यन्तरबाह्यप्रयत्नयोः विभिन्नप्रकाराः यथाक्रमम् अधो वक्ष्यमाणप्रकारेण कीदृशानां वर्णानाम् उच्चारणे प्रयुक्तः इति पश्यामः।

**1. आभ्यन्तरप्रयत्नस्य प्रयोगप्रकाराः।**

आभ्यन्तरप्रयत्ने प्रथमं स्पष्टं प्रयत्नं स्पर्शानामुच्चारणे प्रयुज्यते। स्पर्शाः कादयो मावसानाः वर्णाः। द्वितीयम् ईषत्स्पृष्टम् अन्तःस्थानाम् उच्चारणे प्रसक्तं भवति । य,व,र,ल इत्येते वर्णाः अन्तःस्थाः । तृतीयम् ईषद्विवृतम् ऊष्मणाविर्भावे प्रयुक्तम्। श,ष,स,ह इत्येते वर्णाः ऊष्माणः।

चतुर्थं विवृतं स्वराणां निष्पादने अवश्यकं भवति। अचः (अ,इ,उ,ऋ.ऌ,ए.ओ,ऐ,औ) स्वराः इत्यभिधीयन्ते।

पञ्चमं संवृतं तु ह्रस्वस्य अवर्णस्य प्रयोगे च आवश्यकं भवतीति प्रथमप्रकारस्य प्रयत्नस्य विस्तरः॥

**2. बाह्यप्रयत्नस्य प्रयोगप्रकाराः।**

अनन्तरं बाह्यप्रयत्नस्य प्रयोगप्रकारान् विशदयति। तद्यथा -

खरो विवाराः श्वासा अघोषाश्च। अर्थात्- ख, फ, छ, ठ, थ, च, ट, त, क, प, श, ष, स (खर् प्रत्याहारे अन्तर्भूताः वर्णाः) विवार- श्वास-अघोषनामकान् बाह्यप्रयत्नानाश्रित्य प्रयुक्ताः भवन्ति।

हशः संवारा नादाः घोषाश्च। अर्थात्- ह, य, व, ल, ञ, म, ङ, ण, न, झ, भ, घ, ढ, ध, ज, ब, ग,ड, द (हश् प्रत्याहारान्तर्गताः वर्णाः) संवार- नाद- घोषनामकान् बाह्यप्रयत्नानाश्रित्य जायन्ते।

वर्गाणां प्रथम-तृतीय-पञ्चमाः यणश्च अल्पप्राणाः। अर्थात्- क, च, ट, त, प (वर्गप्रथमाः) ग, ज, ड, द, ब (वर्गतृतीयाः), ङ, ञ, ण, न, म (वर्गपञ्चमाः), तथा य, व, र, ल (यण् प्रत्याहारे अन्तर्भूताः वर्णाः) च अल्पप्राणप्रयत्नेन निष्पादिताः भवन्ति।

वर्गाणां द्वितीय-चतुर्थौ, शलश्च महाप्राणाः। अर्थात्- ख, छ, ठ, थ, फ (वर्गद्वितीयाः) घ, झ, ढ, ध, भ (वर्गचतुर्थाः), तथा श, ष, स, ह (शल् प्रत्याहारे अन्तर्भूताः वर्णाः) महाप्राणाः भवन्ति

## पुनरावृत्तिः (Recap)



SGOU

- शब्दोच्चारणे आवश्यकाः प्रयत्नाः द्विधा, आभ्यन्तरो बाह्यश्च इति।
- आद्यः आभ्यन्तरप्रयत्नः स्पृष्टम्, ईषत्स्पृष्टम्, ईषद्विवृतं, विवृतं, संवृतम् इति पञ्चधा विभक्तम्।
- द्वितीयः बाह्यप्रयत्नः विवारः, संवारः, श्वासः, नादः, घोषः, अघोषः, अल्पप्राणः, महाप्राणः, उदात्तः, अनुदात्तः, स्वरितः चेति एकादशप्रकारः।
- अचः (स्वराक्षराणि) तथा हलश्च (व्यञ्जनाक्षराणि) प्रतिपाद्यन्ते अस्मिन् विभागे।
- माहेश्वरसूत्राणि - 1) अइउण्, 2) ऋऌक्, 3) एओङ्, 4) ऐऔच्, 5) हयवरट् 6) लण्, 7)ञमङणनम्, 8) झभञ्, 9) घढधष्, 10) जबगडदश्, 11) खफछठथचटतव्, 12) कपय्, 13) शषसर्, 14) हल् इति चतुर्दश।
- एषामन्त्याः लोपात्मस्वभावाः इतः भवन्ति।

## वस्तुनिष्ठप्रश्नाः (Answer to Objective type questions)

1. शब्दोच्चारणावश्यकाः प्रयत्नाः कतिविधाः ? ते के ?
2. आभ्यन्तरप्रयत्नाः कति विधा ? के च ते ?
3. अन्तःस्थानां वर्णाः के ?
4. एषामन्त्याः लोपात्मस्वभावाः .......भवन्ति।

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
## (Answer the following questions in one or two sentences)

1. बाह्यप्रयत्नः कति विधम् ? के च ते ?

## निर्दिष्टाभ्यासाः (Assignments)

1. आभ्यन्तरप्रयत्नस्य प्रयोगप्रकारान् विशदयतु।

2. बाह्यप्रयत्नस्य प्रयोगप्रकारान् विशदयतु।

## वस्तुनिष्टप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. द्विविधाः। आभ्यन्तरं बाह्यश्च इति।
2. पञ्चविधाः। स्पृष्टम्, ईषत्स्पृष्टम्, ईषद्विवृतं, विवृतं, संवृतम् इति।
3. य,व,र,ल इति।
4. श,ष,स,ह।
5. इतः।

## सूचनाग्रन्थाः (References)


1. श्रीमन्नारायणमूर्तिः एम् , संस्कृतभाषाशास्त्रोपोद्घातः, डि.के. पब्लिकेशन्स्, दिल्ली, 1984.
2. टि. के रामचन्द्र अय्यर्, ए स्टुडन्टस् हान्टबुक्क् ओफ् कम्पारट्टीव् फिलोलजि, आर्.एस् वाध्यार् आन्ट् सन्स् , कल्पात्ति, पालक्काट्, 1987.
3. रोबिन्स् आर्. एच्. भाषाशास्त्रलघुचरित्रम् , रौट्लेट्ज्, 2013.
4. भाषाशास्त्रप्रवेशिनी, प्रोफ. आर्. एस्. वेङ्कटरामशास्त्री, कुप्पुस्वामिशास्त्रि रिसेर्च् इन्स्टिट्यूट्, चेन्नै 1996.

# Unit-3
# संस्कृते अचः हलः च

## उद्देश्यानि (Learning Outcomes)

- भाषाशास्त्रस्य विकासमधिकृत्य सामान्यपरिज्ञानम्।
- भाषाशास्त्रस्य विभिन्नाः विभागाः।
- भाषाशास्त्रस्य साम्प्रदायिकपठनमधिकृत्य ज्ञानम्।
- स्वराणां वैविध्यं, यत्नानां वैविध्यं, उत्पत्तिस्थानानां वैविध्यं च ज्ञायन्ते।

## प्राग्व्यपेक्षाः (Prerequisites)

अस्मिन्नेकके ध्वनिनिष्पत्तिसहायकानाम् अवयवानां, शब्दोच्चारणप्रकाराणां, संस्कृते विद्यमानानां स्वरवर्णानां तथा स्वरविचारस्य च प्रतिपादनं क्रियते। तत्र स्वरवर्णानां व्यञ्जनवर्णानां च उत्पत्तौ हेतुभूताः अवयवाः आवश्यकाः प्रयत्नाः च परामर्शयोग्याः भवन्ति । तथैव स्वराणां वैविध्यं, यत्नानां वैविध्यं, उत्पत्तिस्थानानां वैविध्यं च प्रतिपाद्यानि सन्ति।

## मुख्यविषयाः (Keywords)

माहेश्वरसूत्राणि, अचः, हलः, स्पर्शाः।

## Discussions

ध्वनिचर्चायां प्रथमतः उच्चारणावयवान् अनन्तरं शब्दोच्चारणास्पदान् प्रयत्नांश्च विशदीकृत्य पुनः अचः (स्वराक्षराणि) तथा हलश्च (व्यञ्जनाक्षराणि) प्रतिपाद्यन्ते अस्मिन् विभागे। भाषान्तर्गतानि सर्वाण्यप्यक्षराणि शिवसूत्रजालमिति प्रथिते माहेश्वरसूत्रसमाहारे घटितानि वर्तन्ते। माहेश्वरसूत्राणि यथा-

1) अइउण्, 2) ऋलृक्, 3) एओङ्, 4) ऐऔच्, 5) हयवरट्, 6) लण्, 7) ञमङणनम्, 8) झभञ्, 9) घढधष्, 10) जबगडदश, 11) खफछठथचटतव्, 12) कपय्, 13) शषसर्, 14) हल् इति चतुर्दश। एषामन्त्याः लोपात्मस्वभावाः इतः भवन्ति। अत्र आद्यानि चत्वारि सूत्राणि अचां (स्वरवर्णानां) ह्रस्वरूपाणि प्रतिनिधीकुर्वन्ति। ह वर्जयित्वा पञ्चमषष्ठे सूत्रे यणः (अन्तःस्थान्) प्रतिनिधीकुरुतः। सप्तमादारभ्य द्वादशपर्यान्तानि सूत्राणि यथाक्रमं वर्गपञ्चमान्, वर्गचतुर्थान्, वर्गतृतीयान्, वर्गद्वितीयान्, वर्गप्रथमान् च प्रतिनिधीकुर्वन्ति। एतान्यक्षराणि स्पर्शाः इति व्यवह्रियन्ते। अर्थात् क इत्यारभ्य म पर्यन्तं स्पर्शाः अथवा वर्गाक्षराणि इति संज्ञितानि । कादयो मावसानाः स्पर्शाः इत्युक्तम् । हकारादिषु अकारः उच्चारणार्थः इति चोक्तम्। लण् सूत्रमध्ये यः अकारः सः इत्संज्ञकः च॥

## पुनरावृत्तिः (Recap)

- ध्वनिचर्चायां प्रथमतः उच्चारणावयवान् अनन्तरं शब्दोच्चारणास्पदान् प्रयत्नांश्च विशदीक्रियन्ते।
- पुनः अचः (स्वराक्षराणि) तथा हलश्च (व्यञ्जनाक्षराणि) प्रतिपाद्यन्ते।
- ह वर्जयित्वा पञ्चमषष्ठे सूत्रे यणः (अन्तःस्थान्) प्रतिनिधीकुरुतः।
- अर्थात् क इत्यारभ्य म पर्यन्तं स्पर्शाः अथवा वर्गाक्षराणि इति संज्ञितानि।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

ऊष्माणः वर्णाः के ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत
## (Answer the following questions in one or two sentences)

स्पर्शाः के ?

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

श,ष,स,ह।

## सूचनाग्रन्थाः (References)


1. श्रीमन्नारायणमूर्तिः एम् , संस्कृतभाषाशास्त्रोपोद्घातः, डि.के. पब्लिकेशन्स्, दिल्ली, 1984.
2. टि. के रामचन्द्र अय्यर्, ए स्टुडन्टस् हान्टबुक्क् ओफ् कम्पारट्टीव् फिलोलजि, आर्.एस् वाध्यार् आन्ट् सन्स् , कल्पात्ति, पालक्काट्, 1987.
3. रोबिन्स् आर्. एच्. भाषाशास्त्रलघुचरित्रम् , रौट्लेट्ज्, 2013.
4. भाषाशास्त्रप्रवेशिनी, प्रोफ. आर्. एस्. वेङ्कटरामशास्त्री, कुप्पुस्वामिशास्त्रि रिसेर्च् इन्स्टिट्यूट्, चेन्नै 1996.

# Unit-4
# स्वरविचारः

## उद्देश्यानि (Learning Outcomes)

- भाषाशास्त्रस्य विकासमधिकृत्य सामान्यपरिज्ञानम्।
- भाषाशास्त्रस्य विभिन्नाः विभागाः।
- भाषाशास्त्रस्य साम्प्रदायिकपठनमधिकृत्य ज्ञानम्।
- स्वराणां वैविध्यं, यत्नानां वैविध्यं, उत्पत्तिस्थानानां वैविध्यं च जानन्ति।
- उदात्तानुदात्तादिभेदान् अवगच्छति।

## प्राग्व्यपेक्षाः (Prerequisites)

अस्मिन्नेकके ध्वनिनिष्पत्तिसहायकानाम् अवयवानां, शब्दोच्चारणप्रकाराणां, संस्कृते विद्यमानानां स्वरवर्णानां तथा स्वरविचारस्य च प्रतिपादनं क्रियते। तत्र स्वरवर्णानां व्यञ्जनवर्णानां च उत्पत्तौ हेतुभूताः अवयवाः आवश्यकाः प्रयत्नाः च परामर्शयोग्याः भवन्ति । तथैव स्वराणां वैविध्यं, यत्नानां वैविध्यं, उत्पत्तिस्थानानां वैविध्यं च प्रतिपाद्यानि सन्ति। भाषायाः ध्वनिपरिणामेषु स्वरविचारः प्राधान्यमर्हति।

## मुख्यविषयाः (Keywords)

स्वरविचारः, स्वरबलावृत्तिः, आङ्गलभाषा, पतलोद्गमनावृत्तिः, उदात्तानुदात्तस्वरिताः, पतनोद्गमउदात्तादिभेदाः, कण्ठगोलकम्।

## Discussions

### स्वरविचारः (Accent)

भाषायाः ध्वनिपरिणामेषु स्वरविचारः (Accent) प्राधान्यमर्हति। स्वरः इति पदम् अर्थद्वितयं व्यनक्ति। अतः तत्तदर्थविवक्षकाले विशेषणविशिष्टं प्रयुज्यते- पतनोद्गमनावृत्तिः, (Pitch Accent) स्वरबलावृत्तिः (Stress Accent) इति च। तत्र प्रथमः पतनोद्गमनावृत्तिः (Pitch Accent)

संस्कृत-प्राकृत-ग्रीक्भाषयोः प्रचुरतया दृश्यते। द्वितीयः स्वरबलावृत्तिः (Stress Accent) यूरोप्यन्भाषासु विशिष्य आङ्गलभाषायां विपुलतया दृश्यते। भारतीयेषु स्वरप्रक्रियाग्रन्थेषु पतनोद्गमनवृत्तिः (Pitch Accent) विमृष्टः दृश्यते। सर्वत्रापि उभयप्रकारकत्वं द्रष्टुं शक्यते। वैशेष्यात्तु तद्वादःतद्वादः इति न्यायेन यत्र यदधिकं दृश्यते सा भाषातत्स्वराङ्कितभाषेति व्यपदिश्यते। प्रतिज्ञाकाले (Affirmative mood) स्वरबलावृत्तिः (Stress Accent) तथा प्रश्नकाले (Interrogative Mood) पतनोद्गमनावृत्तिः (Pitch Accent) च भवति आङ्गलभाषायाम्।

स्वरबलावृत्त्या (Stress Accent) उच्चारणकाले श्वासकोशेभ्यः अधिकमिव सबलमिव च श्वासः निस्सरति। सङ्गीते प्रसिद्धः यो ग्रामविशेषमूर्च्छनादिः तत्र पतनोद्गमनवृत्तिः (Pitch Accent) च प्रयुज्यते। वैदिकसंस्कृते ग्रीक्भाषायां च मात्रोच्चारणकाले कण्ठगोलके पतनोद्गमनप्रतीतिः (Pitch Accent) वरीवर्ति।

**वृत्तिद्वयमेतत् उदात्तादि भेदेन विभज्य विशदीकर्तुं शक्यते।**

उदात्तानुदात्तस्वरिताः- ताल्वादिषु सभागेषु स्थानेषु ऊर्ध्वेषु निष्पन्नः अच् उदात्तसंज्ञः स्यादिति उच्चैरुदात्तः इति सूत्रेण विधीयते। अवर्णस्य उच्चारणस्थानं कण्ठः भवति। अतः कण्ठस्य ऊर्ध्वभागात् सम्पद्यमानः अ, आ, आ3 इत् ह्रस्वदीर्घप्लुतात्मकः स्वरः उदात्तसंज्ञकः भवति। एवं तालुस्थानीयस्य इवर्णस्य इ, ई, ई3 इत्येतेषां ह्रस्वदीर्घप्लुतानां, ओष्ठस्थानीयस्य उवर्णस्य उ, ऊ, ऊ3 इत्येतेषां ह्रस्वदीर्घप्लुतानां, मूर्धास्थानीयस्य ऋकारस्य ऋ, ॠ2, ॠ3 इत्येतेषां तथा कण्ठतालव्ययोः ए, ऐ वर्णयोः यथाक्रमं ए, ए3, ऐ, ऐ3, दीर्घप्लुतानां, कण्ठोष्ठस्थानीययोः ओ, औ इति वर्णयोः ओ, ओ3, औ, औ3 दीर्घप्लुतानाञ्च सर्वेषां तत्तत्स्थानीयोर्ध्वभागात् निष्पन्नत्वाद् उदात्तसंज्ञकत्वमिति ज्ञेयम्। अनेन प्रकारेण निर्दिष्टस्य स्थानस्य केवलम् ऊर्ध्वभागात् यस्य स्वरस्य उच्चारणं भवति सः स्वरः उदात्तः इति नाम्ना ज्ञायते।

ताल्वादिषु सभागेषु स्थानेषु अधोभागेषु निष्पन्नः अच् अनुदात्तसंज्ञः- स्यादिति नीचैरनुदात्तः इति सूत्रेण विधीयते।

अनेनैव प्रकारेण निर्दिष्टानाम् अ, आ, आ3- इ, ई, ई3- उ, ऊ, ऊ3- ए, ए3- ऐ, ऐ3- ओ, ओ3- औ, औ3- वर्णानां केवलम् अधोभागात् उच्चरणं भवतीत्यतः एते सर्वेपि वर्णाः अनुदात्तसंज्ञाः स्युः॥

तथैव उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सः अच् स्वरितसंज्ञः स्यात्। अर्थात्- अ, आ, आ3- इ, ई, ई3 इत्यादि समस्तस्वरवर्णानाम् उच्चारणं निर्दिष्टस्थानस्य ऊर्ध्वभागात् अधोभागात् च यदि भवति तर्हि सः स्वरः स्वरितः इति नाम्ना ज्ञायते। समाहारः स्वरितः इति पाणिनीयसूत्रम्॥

वस्तुतः उदात्त-अनुदात्त-स्वरितसंज्ञाः वेदानाम् उच्चारणस्य सन्दर्भे प्रसिद्धाः वर्तन्ते । एवं शब्दोच्चारणास्पदाः प्रयत्नाः प्रतिपादिताः संस्कृतभाषावैयाकरणैः।

**अथ स्वरवर्णाः -**

अचः स्वराः। अचः इत् माहेश्वरसूत्रेषु प्रथमस्य अइउण् इत्यस्य अ इत्यस्मादारभ्य चतुर्थस्य एऔच् इत्यस्य च् इति इतः पूर्वम् औ पर्यन्तं वर्तमानाः नव वर्णाः एव। ते च अ, इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ इति। तेषां च ह्रस्वदीर्घप्लुत- उदात्तानुदात्तस्वरित- अनुनासिकाननुनासिकभेदात् वैविध्यमस्ति। अ, इ, उ, ऋ इत्येतेषां वर्णानां प्रत्येकम् अष्टादशभेदाः सन्ति। ऌ वर्णस्य दीर्घाभावात् द्वादशभेदाः। ए, ओ, ऐ, औ इत्येतेषां वर्णानां ह्रस्वाभावात् द्वादशभेदाः। स्वराणाम् अष्टादशभेदोपदर्शिका पट्टिका अधो दीयते।

| | | |
|---|---|---|
| अइउऋऌ | आ ई ऊ ॠ ए ओ ऐ औ | अ3 इ3 उ3 ऋ3 ऌ3 ए3 ओ3 ऐ3 औ3 |
| ह्रस्वभेदाः | दीर्घभेदाः | प्लुतभेदाः |
| 1. ह्रस्वोदात्तानुनासिकः<br>2. ह्रस्वोदात्ताननुनासिकः<br>3. ह्रस्वानुदात्तानुनासिकः<br>4. ह्रस्वानुदात्ताननुनासिकः<br>5. ह्रस्वस्वरितानुनासिकः<br>6. ह्रस्वस्वरिताननुनासिकः | 7. दीर्घोदात्तानुनासिकः<br>8. दीर्घोदात्ताननुनासिकः<br>9. दीर्घानुदात्तानुनासिकः<br>10.दीर्घानुदात्ताननुनासिकः<br>11.दीर्घस्वरितानुनासिकः<br>12.दीर्घस्वरिताननुनासिकः | 13.प्लुतोदात्तानुनासिकः<br>14.प्लुतोदात्ताननुनासिकः<br>15.प्लुतानुदात्तानुनासिकः<br>16.प्लुतानुदात्ताननुनासिकः<br>17.प्लुतस्वरितानुनासिकः<br>18.प्लुतस्वरिताननुनासिकः |

उच्चारणावयवान्, शब्दोच्चारणास्पदान्प्रश्नान्, अचां हलां (स्वराणां व्यञ्जनानां) प्रभेदान् च पुरस्कृत्य ध्वनिचर्चा। अत्र सूचिता अतीतं भागत्रयापेक्षया अस्मिन्भागे स्वरवर्णानां संयोजने (सन्धिकार्ये) कृते जायमानाः परिणामप्रकाराः सोदाहरणं प्रतिपाद्यन्ते। ते च यथाक्रमं सवर्णदीर्घसन्धिः, गुणसन्धिः, वृद्धिसन्धिः, अयादेशसन्धिः, यण्सन्धिः, पूर्वरूप- एकादेशसन्धिः, पररूप- एकादेशसन्धिः, द्वित्वसन्धिः इत्यादयः। सर्वाण्यपि स्वरसन्धिकार्याणि (अच्सन्धिकार्याणि) पाणिनीयनिर्दिष्टप्रकारं वर्तते॥

**टिप्पणी।**

अचः स्वराः। अ इ उ ऋ लृ ए ओ ऐ औ इत्येते स्वराः। कादयो मावसानाः स्पर्शाः। पञ्चविंशति वर्गाक्षराण्येव स्पर्शाः। क आदौ येषां ते कादयः। म अवसाने येषां ते मावसानाः।

यणः- अन्तःस्थाः। य, व, र, ल इत्येते अन्तःस्थाः।

शलः- ऊष्माणः। श,ष,स इत्येते ऊष्माणः।

अम्, अः इति अचः परौ (म्, : ) यथाक्रमम् अनुस्वारविसर्गौ च।

एवं संस्कृतभाषायां विद्यमानानाम् अचां (स्वराणां), हलां (व्यञ्जनानां) च वैविध्यं समग्रतया दर्शितम्॥

## पुनरावृत्तिः (Recap)

- भाषायाः ध्वनिपरिणामेषु स्वरविचारः प्राधान्यमर्हति।
- अतः तत्तदर्थविवक्षकाले विशेषणविशिष्टं प्रयुज्यते- पतनोद्गमनावृत्तिः, (Pitch Accent) स्वरबलावृत्तिः (Stress Accent) इति च।
- स्वरबलावृत्त्या उच्चारणकाले श्वासकोशेभ्यः अधिकमिव सबलमिव च श्वासः निसरति।
- सङ्गीतेप्रसिद्धः यो ग्रामविशेषमूर्च्छनादिः तत्र पतनोद्गमनवृत्तिः च प्रयुज्यते।
- उदात्तानुदात्तस्वरिताः- ताल्वादिषु सभागेषु स्थानेषु ऊर्ध्वेषु निष्पन्नः अच् उदात्तसंज्ञः स्यादिति उच्चैरुदात्तः इति सूत्रेण विधीयते।
- ताल्वादिषु सभागेषु स्थानेषु अधोभागेषु निष्पन्नः अच् अनुदात्तसंज्ञः स्यादिति नीचैरनुदात्तः इति सूत्रेण विधीयते।
- उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सः अच् स्वरितसंज्ञः स्यात्।
- वस्तुतः उदात्त-अनुदात्त-स्वरितसंज्ञाः वेदानाम् उच्चारणस्य सन्दर्भे प्रसिद्धाः वर्तन्ते।
- अचः इत् माहेश्वरसूत्रेषु प्रथमस्य अइउण् इत्यस्य अ इत्यस्मादारभ्य चतुर्थस्य एऔच् इत्यस्य च् इति इतः पूर्वम् औ पर्यन्तं वर्तमानाः नव वर्णाः एव।

## वस्तुनिष्ठप्रश्नाः (Answer to Objective type questions)

1. कुत्र प्रसिद्धः पतनोद्गमनवृत्तिः?
2. मात्रोच्चारणकाले कण्ठगोलके ..........प्रतीतिः वरीवर्ति।
3. केन सूत्रेण उदात्तसंज्ञा विधीयते ?
4. अनुदात्तसंज्ञा केन सूत्रेण विधीयते?
5. अचः नाम किम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
(Answer the following questions in one or two sentences)

1. का नाम स्वरबलावृत्तिः?
2. पतनोद्गमनवृत्तिः नाम किम्?
3. वृत्तिद्वयं किम्?

## निर्दिष्टाभ्यासाः (Assignments)

1. स्वरवर्णान् विशदयत।
2. वृत्तिद्वयम् उदात्तादि भेदेन विभज्य विशदीकरोतु।

## वस्तुनिष्टप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. सङ्गीते।
2. पतनोद्गमनावृत्तेः।
3. उच्चैरुदात्तः।
4. नीचैरनुदात्तः।

5. स्वराक्षराणि।

## सूचनाग्रन्थाः (References)


1. श्रीमन्नारायणमूर्तिः एम्, संस्कृतभाषाशास्त्रोपोद्घातः, डि.के. पब्लिकेशन्स्, दिल्ली, 1984.
2. टि. के रामचन्द्र अय्यर्, ए स्टुडन्ट्स् हान्टबुक्क् ओफ् कम्पारट्टीव् फिलोलजि, आर्.एस् वाध्यार् आन्ट् सन्स्, कल्पात्ति, पालक्काट्, 1987.
3. रोबिन्स् आर्. एच्. भाषाशास्त्रलघुचरित्रम्, रौट्लेट्ज्, 2013.
4. भाषाशास्त्रप्रवेशिनी, प्रोफ. आर्. एस्. वेङ्कटरामशास्त्री, कुप्पुस्वामिशास्त्रि रिसेर्च् इन्स्टिट्यूट्, चेन्नै 1996.

BLOCK-5

# ध्वनिनियमाः

# Unit-1
# भाषापरिणतिः

## उद्देश्यानि (Learning Outcomes)

- भाषापरिणतेः भेदं ज्ञायते।
- भाषापरिणतेः कारणानि ज्ञायते।
- भाषाशास्त्रमधिकृत्य सामान्यपरिज्ञानं लभते।
- भाषाशास्त्रस्य लक्ष्यावगतिः।

## प्राग्व्यपेक्षाः (Pre requisites)

भाषाशास्त्रं नाम किमिति परिज्ञानमनिवार्यं भवति। कदा अस्य शास्त्रस्य उत्पत्तिरिति ज्ञातव्यम्। लोके प्रयुक्ताः सर्वा अपि भाषाः अनुस्यूतं परिणतिं भजन्ते। सा च भाषापरिणतिः स्वनपरा, व्याकरणपरा, अर्थपरा वा स्यात्। तदनुसारेण स्वनपरिणतिः, व्याकरणपरिणतिः, अर्थपरिणतिः इत्येवं सा बहुविधा भवति।

## मुख्यपदानि (Key Words)

स्वनपरिणतिः, व्याकरणपरिणतिः, अर्थपरिणतिः, शब्दसम्बन्धी, अर्थसम्बन्धी, ध्वनिसम्बन्धी, केवलवर्णभेदः, समूहात्मकः, औपाधिकः, सावकाशभेदः, शीघ्रतरभेदः, समानाक्षराणां समीपस्थितिः, संयुक्ताक्षराणां उच्चारणक्लेशः,सादृश्यभ्रान्तिः

## Discussion

### भाषापरिणतिः

लोके प्रयुक्ताः सर्वा अपि भाषाः अनुस्यूतं परिणतिं भजन्ते। क्वचित् सा परिणतिः व्यक्ततरा, क्वचित्तु सूक्ष्मतरा वा स्यादिति भाषाशास्त्रकारैः निर्णीतम्। सा च भाषापरिणतिः स्वनपरा, व्याकरणपरा, अर्थपरा वा स्यात्। तदनुसारेण स्वनपरिणतिः, व्याकरणपरिणतिः, अर्थपरिणतिः इत्येवं सा बहुविधा भवति। तथापि सामान्यतः शब्दसम्बन्धी (phonetic) तथा अर्थसम्बन्धी (semantic) चेति द्विधा परिणतेः भेदः। यत्र वर्णस्य वर्णसमूहात्मकस्य पदस्य वा अर्थभेदं विनैव परिणतिः सा शब्दपरिणामः। यत्र तु वर्णादीनामभेदेऽपि अर्थस्य केवलं भेदः स अर्थपरिणामः। शब्दपरिणामस्यापि ध्वनिसम्बन्धी (acoustic) तथा जैविकश्चेति (organic) परिणामभेदद्वयमस्ति। यत्र श्रवणविषये प्रमादेन वर्णपदयोः भेदः जातः, स च पश्चात् सामान्यतया अङ्गीकृतः स ध्वनिसम्बन्धी परिणामः। यथा ब व इति वर्णयोः मिथः स्वीकारः। उच्चारणवैषम्यादिना वर्णपदभेदे तु जैविकः भेदः यथा ज्ञा इत्यस्य ग्या इति प्रयोगः। भाषापरिणतेः अन्ये भेदाः सन्ति यथा केवलवर्णभेदः, समूहात्मकश्चेति तथा औपाधिकः उपाधिरहितश्चेति एवं सावकाशभेदः शीघ्रतरभेदश्चेति आचार्यैः विचारितः। लोकेषु यथा जनानां सर्वेषु प्रवर्तनेषु ये भेदाः सर्वत्र सर्वदा दृश्यन्ते सः भेदः निश्चयेन भाषायामपि प्रकटतया द्रष्टुं शक्यते। या भाषा भेदरहिता भवति तस्य जैवावस्थापि न स्यादिति वक्तुं शक्यते। किन्तु सर्वासु भाषासु सा परिणति न एकरूपा च भवति। कासुचित् भाषासु सा परिणतिः प्रकटा अन्यासु तु नैवंविधा दृश्यते। तत्र भाषापरिणतेः कानि कारणानीति आचार्यैः बहुधा विचिन्तितानि।

### भाषापरिणतेः कारणानि

भाषापरिणतेः बहूनि कारणानि सन्ति। तत्र प्रथमं तावत् उच्चारणविषये सौकर्यमेव (ease of effort) मुख्यतमं कारणम्। वर्णानां पदानां वा उच्चारणे क्लिष्टतां परिहर्तुं जनाः सर्वथा प्रयतन्ते। समानाक्षराणां समीपस्थितिः, वर्णानां भिन्नस्थानस्थितानां समीपस्थितिः, संयुक्ताक्षराणां उच्चारणक्लेशः, उच्चारणविषये वैकल्यम्, सादृश्यभ्रान्तिः((analogy), श्रवणविषये प्रमादः, उदात्तादिस्थानभेदः इत्येवं सन्ति बहवः भेदाः। एवं भिन्नदेशेषु भूप्रकृतेः, संस्कारस्य, परिस्थितेः, इतरभाषाभिः संयोजनस्य च भेदेन भाषायाः स्वनादिविविधतलेषु परिणतिं द्रष्टुं शक्यते। यद्यपि पाणिनिप्रभृतिभिः व्याकरणरचनया सम्यक्

कृतायाः संस्कृतभाषायाः प्रयोगः प्रायेण सर्वत्र एकरूपो भवति, तथापि भारतदेशे विभिन्नप्रविश्यासु प्रयुक्तानां शौरसेनीमागधीप्रभृतीनां बहुरूपाणां प्रकृतोपयोगिनां प्राकृतभाषाणां मध्ये एकस्यैव वर्णस्य, पदस्य, व्याकरणसम्प्रदायस्य च महान् भेदो दृश्यते। अत एव पश्चात्काले द्वादशशतकादारभ्य प्रसिद्धाः आधुनिका बहवो भारतीयभाषाः नितरां भेदेन युक्ताः दृश्यन्ते।

## पुनरावृत्तिः (Recap)

- लोके प्रयुक्ताः सर्वा अपि भाषाः अनुस्यूतं परिणतिं भजन्ते।
- सा च भाषापरिणतिः स्वनपरा, व्याकरणपरा, अर्थपरा वा स्यात्। तदनुसारेण स्वनपरिणतिः, व्याकरणपरिणतिः, अर्थपरिणतिः इत्येवं सा बहुविधा भवति।
- शब्दसम्बन्धी(phonetic), अर्थसम्बन्धी (semantic)चेति द्विधा परिणतेः भेदः।
- यत्र तु वर्णादीनामभेदेऽपि अर्थस्य केवलं भेदः स अर्थपरिणामः।
- शब्दपरिणामस्यापि ध्वनिसम्बन्धी (acoustic), जैविकश्चेति (organic) परिणामभेदद्वयम् अस्ति।
- यत्र श्रवणविषये प्रमादेन वर्णपदयोः भेदः जातः, स च पश्चात् सामान्यतया अङ्गीकृतः स ध्वनिसम्बन्धी परिणामः।
- यथा ब, व इति वर्णयोः मिथः स्वीकारः। उच्चारणवैषम्यादिना वर्णपदभेदे तु जैविकः भेदः यथा ज्ञा इत्यस्य ग्या इति प्रयोगः।
- भाषापरिणतेः बहूनि कारणानि सन्ति। तत्र प्रथमं तावत् उच्चारणविषये सौकर्यमेव मुख्यतमं कारणम्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. भाषापरिणतेः कति भेदाः? कानि च तानि?

2. कस्याः भाषायाः जैविकता नास्ति ?
3. भाषापरिणतेः मुख्यं कारणं किम्?
4. प्रसिद्धः संस्कृतव्याकरणाचार्यः कः?
5. शब्दपरिणामस्य भेदद्वयं किम्?

**एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।**
**(Answer the following questions in one or two sentences)**

1. शब्दपरिणामः नाम किम्?
2. अर्थपरिणामः नाम किम्?
3. ध्वनिसम्बन्धी परिणामः नाम किम्?

**निर्दिष्टाभ्यासाः (Assignments)**

1. भाषापरिणतेः कारणानि आधारीकृत्य सोदाहरणं चर्चा क्रियताम्।

**वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)**

1. 2(भेदद्वयम्)। शब्दसम्बन्धी(phonetic),अर्थसम्बन्धी (semantic) चेति।
2. भेदरहितायाः भाषायाः।
3. उच्चारणविषये सौकर्यम्।
4. पाणिनिः।
5. ध्वनिसम्बन्धी (acoustic), जैविकश्चेति(organic)।

## सूचनाग्रन्थाः (References)


1. श्रीमन्नारायणमूर्ति.एम्, संस्कृतभाषाशास्त्रोपोद्घातः (An Introduction to Sanskrit Linguistics), डि.के पब्लिकेषन्स्, दिल्ली 1984.
2. कुञ्जुण्णिराजा के, भारतीयाः अर्थसिद्धान्ताः (Indian Theories of Meaning), अडयार् लैब्ररि, चेन्नै 20, 1977
3. रोबिन्सन् आर् .एच्. भाषाशास्त्रस्य लघुचरित्रम् (A Short History of Linguistics), रौट्लेड्ज् पब्लिकेषन्स् लण्डन् 2013
4. प्रभाकरवार्यर् के. एम्, शान्ता अगस्टिन्, आधुनिकभाषाशास्त्रम् (ആധുനികഭാഷാശാസ്ത്രം), केरलभाषाइन्स्टिट्यूट्ट्, तिरुवनन्तपुरम् 1998
5. रामचन्द्र अय्यर् टिके तुलनात्मकभाषाशास्त्रम् (Comparative Philology), आर्एस् वाध्यार् सन्स् कल्पात्ति पालक्काट्, 1998

# Unit-2
# तालव्यनियमः

## उद्देश्यानि (Learning Outcomes)

- भाषापरिणतेः भेदं जानाति।
- भाषापरिणतेः कारणानि अवगच्छति।
- भाषाशास्त्रमधिकृत्य सामान्यपरिज्ञानं लभते।
- भाषाशास्त्रस्य लक्ष्यावगतिः।

## प्राग्व्यपेक्षाः (Prerequisites)

भाषाशास्त्रं नाम किमिति परिज्ञानमनिवार्यं भवति। कदा अस्य शास्त्रस्य उत्पत्तिरिति ज्ञातव्यम्। लोके प्रयुक्ताः सर्वा अपि भाषाः अनुस्यूतं परिणतिं भजन्ते। सा च भाषापरिणतिः स्वनपरा, व्याकरणपरा, अर्थपरा वा स्यात्। तदनुसारेण स्वनपरिणतिः, व्याकरणपरिणतिः, अर्थपरिणतिः इत्येवं सा बहुविधा भवति। कालानुसृतं भाषासु जायमानानां भेदानां कारणानि सन्ति। तेषु कारण्षु अन्यतमः भवति तालव्यनियमः। तं नियमं पठामः।

## मुख्यविषयाः (Keywords)

भाषाशास्त्रकारः, तालव्यनियमः, अन्तस्थवर्णं, शब्दपरिणामसिद्धान्तम्, ठक्कर्महाशयः, विल्हें तोमस्, quid-cid, qe-ca प्रभृतीनि।

## Discussion

### भाषापरिणामस्य नियमाः

भाषापरिणामस्य नियमाः नाम भाषायां दृश्यमानानां परिणतीनां सामान्यतया आचार्यैः निरीक्षिताः सिद्धान्ताः भवन्ति, न तु ते लोके धर्मार्थशास्त्रादिषु व्यवहारे च निर्दिष्टानां नियमानां सादृश्यं भजन्ते। एत एव ठक्कर् नाम भाषाशास्त्रकारेण भाषापरिणतेः नियमः एवं प्रस्तुतः-

भाषायां परिणतिविषये यः कश्चन नियमो नाम नियतरूपेण भाषायाः विशिष्टे काले सन्दर्भे वा कस्यचित् वर्णस्य वर्णानां वा सविशेषावस्थायां स्थितिमधिकृत्य कृतः प्रस्तावः इति। तत्र बहुभिः भाषाशास्त्रकारैः भाषापरिणतिविषये बहवो नियमाः विभिन्नसन्दर्भेषु निर्दिष्टाः। तत्र प्रसिद्धाः केचन नियमाः अत्र विचार्यन्ते।

## तालव्यनियमः ( The Law of Palatalisation)

तालव्यनियमः बहुभिराचार्यैः समकालमेव व्याख्यातमिति येनेदमाविष्कृतं प्रथमतया इति निर्णेतुमशक्यं भवति। केचन आचार्याः विल्हें तोम्सन् (Wilhelm Thomson ) अस्य सिद्धान्तस्य आविष्कर्ता इति कथयन्ति। अष्टाध्याय्यां पाणिनिना स्वयमेव कवर्गस्य चवर्गप्राप्तिः सूत्ररूपेण निर्दिष्टं वर्तते। तस्य परिस्फुरणमपि अस्मिन् तालव्यनियमे द्रष्टुं शक्यते। तालव्यनियमस्तावत् एवं भवति- इन्टोजर्मानिक् e a इति वर्गीकरणात् प्राक् आर्यभाषासु अन्तस्थवर्णसामीप्ये कण्ठ्यानां (velars and gutturals ) वर्णानां तालव्यप्राप्तिः (Palatal explosives or africates), अन्यत्र तु नैवंविधो भेदः कण्ठ्यानां दृश्यते च इति। उदाहरणानि यथा-

Qe – ce (च)

Qerus – carus (चरुः)

Qeturoes – catvaras (चत्वारः)

Kukis- susis (शुचिः)

Penque- panca (पञ्च)

Qid- cid (चिद्)

Auges- ojas (ओजस्)

यदि तु कण्ठ्याः अन्तस्थैः न अनुगताः सन्ति तथा पूर्वोक्तं तालव्यत्वं न दृश्यते च। यथा-

Kakud- kakud (ककुदः)

Kalos-kalas (कालः)

Juga- yugam (युगम्)

Kukros- Sukras (शुक्र)

एवं च अयं तालव्यनियमः टक्कर्महाशयेन सामान्यतया प्रस्तुतस्य शब्दपरिणामसिद्धान्तस्य सर्वाङ्गीणतया उत्तममुदाहरणं भवति।

## पुनरावृत्तिः (Recap)

- एव ठक्कर् नाम भाषाशास्त्रकारेण भाषापरिणतेः नियमम् आविष्कृतवान्।
- भाषायां परिणतिविषये यः कश्चन नियमो नाम नियतरूपेण भाषायाः विशिष्टे काले सन्दर्भे वा कस्यचित् वर्णस्य वर्णानां वा सविशेषावस्थायां स्थितिमधिकृत्य कृतः प्रस्तावः इति।
- बहुभिः भाषाशास्त्रकारैः भाषापरिणतिविषये बहवो नियमाः विभिन्नसन्दर्भेषु निर्दिष्टाः।
- आचार्याः विल्हें तोम्सन् (Wilhelm Thomson) तालव्यनियमसिद्धान्तस्य आविष्कर्ता इति कथयन्ति।
- अष्टाध्याय्यां पाणिनिना स्वयमेव कवर्गस्य चवर्गप्राप्तिः सूत्ररूपेण निर्दिष्टं वर्तते।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. तालव्यनियमसिद्धान्तस्य (The Law of Palatalisation) आविष्कर्ता कः?
2. भाषापरिणतनियमस्य आचार्यः कः?
3. अष्टाध्यायी इति ग्रन्थस्य कर्ता कः?
4. Qid इति पदं केन रूपेण परिणतिं प्राप्नोति?
5. Penqe किम् संस्कृतपदम्?

## निर्दिष्टाभ्यासाः (Assignments)

1. तालव्यनियमं विशदयत । (The Law of Palatalisation)

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. आचार्याः विल्हें तोम्सन् (Wilhelm Thomson )
2. ठक्कर् (Tucker)
3. पाणिनिः (Panini)
4. cid
5. पञ्च ।

## सूचनाग्रन्थाः (References)


1. श्रीमन्नारायणमूर्ति.एम्, संस्कृतभाषाशास्त्रोपोद्घातः (An Introduction to Sanskrit Linguistics), डि.के पब्लिकेषन्स्, दिल्ली 1984.
2. कुञ्चुण्णिराजा के, भारतीयाः अर्थसिद्धान्ताः (Indian Theories of Meaning), अडयार् लैब्ररि, चेन्नै 20, 1977
3. रोबिन्सन् आर् .एच्. भाषाशास्त्रस्य लघुचरित्रम् (A Short History of Linguistics), रौट्लेड्ज् पब्लिकेषन्स् लण्डन् 2013
4. प्रभाकरवार्यर् के. एम्, शान्ता अगस्टिन्, आधुनिकभाषाशास्त्रम् (ആധുനികഭാഷാശാസ്ത്രം), केरलभाषाइन्स्टिट्यूट्ट्, तिरुवनन्तपुरम् 1998
5. रामचन्द्र अय्यर् टिके तुलनात्मकभाषाशास्त्रम् (Comparative Philology), आर्एस् वाध्यार् सन्स् कल्पात्ति पालक्काट्, 1998

# Unit-3
# ध्वनिपरिणामः

## उद्देश्यानि (Learning Outcomes)

- भाषापरिणतेः भेदं जानाति।
- भाषापरिणतेः कारणानि अवगच्छति।
- भाषाशास्त्रमधिकृत्य सामान्यपरिज्ञानम्
- भाषाशास्त्रस्य लक्ष्यावगतिः

## प्राग्व्यपेक्षाः (Prerequisites)

भाषाशास्त्रं नाम किमिति परिज्ञानमनिवार्यं भवति। कदा अस्य शास्त्रस्य उत्पत्तिरिति ज्ञातव्यम्। लोके प्रयुक्ताः सर्वा अपि भाषाः अनुस्यूतं परिणतिं भजन्ते। सा च भाषापरिणतिः स्वनपरा, व्याकरणपरा, अर्थपरा वा स्यात्। तदनुसारेण स्वनपरिणतिः, व्याकरणपरिणतिः, अर्थपरिणतिः इत्येवं सा बहुविधा भवति। के के ध्वनिपरिणामाः सामान्यतया भाषासु जायन्ते इति कार्यं पठामः।

## मुख्यविषयाः (Keywords)

स्वरकरणम्, समीकरणम्, विषमीकरणम्, लोपः, स्वरलोपः,व्यञ्जनमध्यस्वरलोपः अन्तिमस्वरलोपः, स्वरभक्तिः, स्वरागमः, वर्णविपर्ययः।

## Discussion

### ध्वनिपरिणामः (Phonetic change)

शब्दपरिणामविषये ध्वनेरेव नितरां प्राधान्यमस्ति यत्र बहुतरभेदेन परिणतिर्दृश्यते। तेषां प्रमुखानि संस्कृतसम्बन्धीनि कानिचित् सोदाहरणं दीयन्ते।

1. **स्वरकरणम्-** यत्र व्यञ्जनवर्णः स्वररूपेण परिणमति यथा यज् त- इष्टः, वच् त उक्तः। अत्र यकारः वकारश्च इकाररूपेण उकाररूपेण परिणतौ। पाणिनिना इग्यणः सम्प्रसारणमिति सूत्रितमिदम्।

2. **समीकरणम् ( assimilation)।** समीकरणे पूर्ववर्णस्य वा उत्तरवर्णस्य वा समानरूपतां स्वीकृतं दृश्यते। तत्र पूर्वरूपस्य उपादाने पूर्वादेशः (progressive assimilation) इति तथा पररूपादेशे परादेशः (regressive assimilation) इति च व्यवहारः। क्रमेण उदाहरणम्- चक्र (संस्कृतम्)- चक्क (प्राकृतम्)। वाक् हरिः- वाग्धरिः। तत् लयः तल्लयः, तत् च तच्च।

3. **विषमीकरणम् ( dissimilation)।** यत्र समानवर्णाः समीपस्थिताः वक्तुं क्लिष्टाः भवन्ति तत्र पूर्वस्य परस्य वा वर्णस्य भेदः सम्भवति। अत्रापि पूर्वपरभेदेन द्वैविध्यमस्ति। यथा- पुरुषः (संस्कृतम्)- पुरिष (प्राकृतम्), नूपुरः (संस्कृतम्)- नइउर (प्राकृतम्)।

4. **लोपः (Haplology )।** समीपस्थयोः समानवर्णयोः एकस्य लोपः अत्र सम्भवति। यथा जहीहि- जहि, शष्पपिञ्जरः- शष्पिञ्जरः। पृषोदरादिगणं संस्कृते प्रसिद्धं भवति यत्र पृषत् उदरमित्यत्र पृषोदरमिति रूपम्।

5. **स्वरलोपः (Aphaeresis)।** व्यञ्जनवर्णात् पूर्वस्य स्वरस्य लोपः अत्र सम्भवति। यथा- अपिधानम्- पिधानम्, अवगाह्य -वगाह्य। वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः। अस्ति, स्तः, सन्ति। इत्यादि।

6. **व्यञ्जनमध्यस्वरलोपः (consonant mid-vowel loss)।** अत्र व्यञ्जनमध्यस्थितस्य स्वरस्य लोपः सम्भवति। यथा- राजन् आ राज्ञा, भूमन् आ भूम्ना।

7. **अन्तिमस्वरलोपः(loss of the vowel at me end )।** पदे व्यञ्जनात् परस्य अन्तिमस्वरस्य लोपः। यथा- अभवत् इ- अभवत्।

8. **स्वरभक्तिः (addition of vowel in the middle )।** यत्र संयुक्तवर्णे सुकरतया उच्चारणाय स्वरवर्णः स्वीक्रियते तत्र स्वरभक्तिः। यथा – स्वर्णः सुवर्णः, पृथ्वी- पृथिवी, चन्द्रः- चन्दिरः, हर्षः- हरिषः

9. **स्वरागमः(Appearances of swara in the beginning )।** व्यञ्जनस्य पूर्वं पदारम्भे स्वरागमः क्वचित् दृश्यते। यथा- रुधिरम्- उरुधिरम्, रामन् – इरामन् (तमिल्)।

10. **वर्णविपर्ययः (change of letters)।** यत्र वर्णद्वयं मिथः स्थानविपर्ययेण वर्तेते तत् वर्णविपर्ययो नाम। यथा- हिंसा- सिंहः, पश्यकः- कश्यपः, मरतकम्- मरकतम्, वाराणसी- बनारस्, नालिकेरः- नारियेल्। एवं अन्ये च बहवो वर्णध्वनिपरिणामाः भाषासु द्रष्टुं शक्यन्ते। अनया रीत्या उदाहरणान्तराणि वक्तुं शक्यन्ते।

## पुनरावृत्तिः (Recap)

- शब्दपरिणामविषये ध्वनेरेव नितरां प्राधान्यमस्ति।
- स्वरकरणम्- यत्र व्यञ्जनवर्णः स्वररूपेण परिणमति यथा यज् त- इष्टः, वच् त उक्तः।
- समीकरणम् - समीकरणे पूर्ववर्णस्य वा उत्तरवर्णस्य वा समानरूपतां स्वीकृतं दृश्यते।
- विषमीकरणम् - यत्र समानवर्णाः समीपस्थिताः वक्तुं क्लिष्टाः भवन्ति तत्र पूर्वस्य परस्य वा वर्णस्य भेदः सम्भवति।
- लोपः- समीपस्थयोः समानवर्णयोः एकस्य लोपः अत्र सम्भवति।
- स्वरलोपः- व्यञ्जनवर्णात् पूर्वस्य स्वरस्य लोपः अत्र सम्भवति।
- व्यञ्जनमध्यस्वरलोपः- अत्र व्यञ्जनमध्यस्थितस्य स्वरस्य लोपः सम्भवति।
- अन्तिमस्वरलोपः- पदे व्यञ्जनात् परस्य अन्तिमस्वरस्य लोपः।
- स्वरभक्तिः- यत्र संयुक्तवर्णे सुकरतया उच्चारणाय स्वरवर्णः स्वीक्रियते तत्र स्वरभक्तिः।
- स्वरागमः- व्यञ्जनस्य पूर्वं पदारम्भे स्वरागमः क्वचित् दृश्यते।
- वर्णविपर्ययः- यत्र वर्णद्वयं मिथः स्थानविपर्ययेण वर्तेते तत् वर्णविपर्ययो नाम।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. व्यञ्जनानां स्वरपरिणामस्य संज्ञा किम्?
2. समीकरणपरिणतेः कति भेदौ?
3. लोपपरिणतेः उदाहरणं किम्?
4. स्वरभक्तेः उदाहरणं किम्?

5. समीपस्थयोः समानवर्णयोः एकस्य ........सम्भवति। (रिक्तं पूरयत)

6. व्यञ्जनवर्णात् पूर्वस्य .......लोपः सम्भवति। (रिक्तं पूरयत)

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. वर्णविपर्ययः नाम किम्?
2. स्वरभक्तिः नाम किम्?
3. समीकरणं नाम किम्?
4. विषमीकरणम् नाम किम्?
5. स्वरकरणं नाम किम्?

## निर्दिष्टाभ्यासाः (Assignments)

1. सर्वेषां ध्वनिपरिणामानां उदाहरणान्तराणि सञ्चिनुत।
2. शब्दपरिणामविषये ध्वनेरेव प्राधान्यं विशदयत।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. स्वरकरणम्।
2. द्वौ (2)।
3. जहीहि- जहि।
4. पृथ्वी- पृथिवी।
5. लोपः।
6. स्वरस्य।

## अधिकवाचनग्रन्थौ (Suggested Readings)


1. श्रीमन्नारायणमूर्ति.एम्, संस्कृतभाषाशास्त्रोपोद्घातः (An Introduction to Sanskrit Linguistics), डि.के पब्लिकेषन्स्, दिल्ली 1984.
2. कुञ्ञुण्णिराजा के, भारतीयाः अर्थसिद्धान्ताः (Indian Theories of Meaning), अडयार् लैब्ररि, चेन्नै 20, 1977
3. रोबिन्सन् आर् .एच्. भाषाशास्त्रस्य लघुचरित्रम् (A Short History of Linguistics), रौट्लेड्ज् पब्लिकेषन्स् लण्डन् 2013
4. प्रभाकरवार्यर् के. एम्, शान्ता अगस्टिन्, आधुनिकभाषाशास्त्रम् (ആധുനികഭാഷാശാസ്ത്രം), केरलभाषाइन्स्टिट्यूट्ट्, तिरुवनन्तपुरम् 1998
5. रामचन्द्र अय्यर् टिके तुलनात्मकभाषाशास्त्रम् (Comparative Philology), आर्एस् वाध्यार् सन्स् कल्पात्ति पालक्काट्, 1998

# Unit-4
# सादृश्यविचारः

## उद्देश्यानि (Learning Outcomes)

- भाषापरिणतेः भेदं जानाति।
- भाषापरिणतेः कारणानि अवगच्छति।
- भाषाशास्त्रमधिकृत्य सामान्यपरिज्ञानम्।
- भाषाशास्त्रस्य लक्ष्यावगतिः।
- सादृश्यसिद्धान्तं परिचिनोति।

## प्राग्व्यपेक्षाः (Prerequisites)

भाषाशास्त्रं नाम किमिति परिज्ञानमनिवार्यं भवति। कदा अस्य शास्त्रस्य उत्पत्तिरिति ज्ञातव्यम्। लोके प्रयुक्ताः सर्वा अपि भाषाः अनुस्यूतं परिणतिं भजन्ते। सा च भाषापरिणतिः स्वनपरा, व्याकरणपरा, अर्थपरा वा स्यात्। तदनुसारेण स्वनपरिणतिः, व्याकरणपरिणतिः, अर्थपरिणतिः इत्येवं सा बहुविधा भवति। पदानां रूपनिष्पत्तौ सादृश्यसिद्धान्तं कीदृशं स्थानं वहतीति पठामः।

## मुख्यविषयाः (Keywords)

सादृश्यविचारः, रूपपरसादृश्यम्, युक्तिपरसादृश्यम्, आनुपातिकसादृश्यं, वैदिकं, ब्रुग्मान्, ओस्टोफ्, सादृश्यभ्रान्तिः, पितुः मातुः इति वत् सख्युः, पत्युः इति, एकादशवत् द्वादश।

## Discussion

### सादृश्यविचारः (Analogy)

शब्दपरिणामविचारे ये केचन परिणामाः व्याख्यातुमपि अशक्याः ते सर्वे अपि अपवादरूपैणैव पूर्विकैः भाषाशास्त्रकारैः गणिताः। किन्तु एकोनविंशतिशतकस्य अन्त्ये दशके ब्रुग्मान् (Brugmann) ओस्टोफ् (Austoff) प्रभृतयः एनमपवादनामानं सादृश्यविचारे अन्यथा समर्थितवन्तः। अयं च सादृश्यविचारः सहयोगभावेन वाचां प्रभावेन वा संभवति। सादृश्यकरणं नाम मानवानां सामान्यरूपः कश्चन सम्प्रदायो भवति यत्र मनः सौकर्यार्थं वर्णानां लोपं वा आगमं वा स्वीकरोति। केचन एनं सादृश्यभ्रान्तिरिति (false analogy) च व्यवहरन्ति। वस्तुतः अयं सादृश्यकरणमपि शब्दपरिणतिविषये सुमहदुपकरोति।

सादृश्यकरणस्य सामान्यतया त्रिधा भेदोऽपि वक्तुं शक्यते। यथा- रूपपरसादृश्यम् (formal), युक्तिपरसादृश्यम् (logical) तथा आनुपातिकसादृश्यं (proportional) चेति।

यत्र कस्यापि रूपस्य सादृश्येन अन्यस्य पदस्य रूपनिष्पत्तिः तत्र रूपपरसादृश्यविचारः यथा पितुः, मातुः, भ्रातुः इत्यादीनां ऋकारान्तरूपाणां दर्शनेन पत्युरिति, सख्युरिति च इकारान्तयोः रूपनिष्पत्तिः।

यत्र तु शब्दस्यैकस्यैव रूपसादृश्येन तस्यैव शब्दस्य तादृशरूपस्वीकारे युक्तिपरसादृश्यविचारः यथा- भवावः, भवामः इत्यत्र भवामि इति रूपदर्शनेन वकारात् परं दीर्घः। एवं एकादश इत्यस्य प्रयोगसाधुत्वं च द्वादश इति प्रयोगदर्शनेन संभवति। आनुपातिकसादृश्यविचारस्तु जर्मन्भाषायामेव प्रस्तुतं दृश्यते, न तु संस्कृते। अग्नि विष्णुः एतयोः समासे अग्निविष्णुरिति भवितव्यं किन्तु इन्द्र अग्नि इत्यत्र इन्द्राग्निरिति दर्शनेन अत्रापि अग्नाविष्णुरिति वैदिकं रूपम्। एवं रथपतिरिति वक्तव्ये क्वचित् बृहस्पतिरिति दर्शनात् रथस्पतिरिति प्रयोगः। अयं च सादृश्यविचारः न केवलं वर्णपरः किन्तु सन्धिकार्ये, समासकार्ये विभक्तिकार्ये च सुलभतया द्रष्टुं शक्यते।

## पुनरावृत्तिः (Recap)

- शब्दपरिणामविचारे ये केचन परिणामाः व्याख्यातुमपि अशक्याः ते सर्वे अपि अपवादरूपैणैव पूर्विकैः भाषाशास्त्रकारैः गणिताः।
- अयं सादृश्यविचारः सहयोगभावेन वाचां प्रभावेन वा संभवति।
- सादृश्यकरणं नाम मानवानां सामान्यरूपः कश्चन सम्प्रदायो भवति यत्र मनः सौकर्यार्थं वर्णानां लोपं वा आगमं वा स्वीकरोति।

- सादृश्यकरणस्य सामान्यतया त्रिधा भेदोऽपि वक्तुं शक्यते। यथा- रूपपरसादृश्यम्, युक्तिपरसादृश्यम् आनुपातिकसादृश्यं चेति।
- यत्र कस्यापि रूपस्य सादृश्येन अन्यस्य पदस्य रूपनिष्पत्तिः तत्र रूपपरसादृश्यविचारः यथा पितुः, मातुः, भ्रातुः इत्यादीनां ऋकारान्तरूपाणां दर्शनेन पत्युरिति, सख्युरिति च इकारान्तयोः रूपनिष्पत्तिः।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. सादृश्यविचारस्य कति मुख्यभेदाः सन्ति?
2. रूपपरसादृश्यमुदाहरत?
3. युक्तिपरसादृश्यस्य उदाहरणं किम्?
4. पत्युरित्यत्र कीदृशः सादृश्यविचारः ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत। (Answer the following questions in one or two sentences)

1. ऋकारान्तरूपाणां मातुः, पितुः इव अन्यः सादृश्यपदं किम्?
2. द्वादश इत्यत्र द्वा इति दीर्घस्यागमनं कथं जातम्?

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. त्रयः (3)।
2. सख्युः।
3. एकादश।
4. रूपपरसादृश्यम्।

## निर्दिष्टाभ्यासाः (Assignments)

1. भाषाव्यवहारे सादृश्यविचारस्य प्राधान्यमधिकृत्य चर्चा प्रबन्धावतरणं वा कार्यम्।

## सूचनाग्रन्थाः (References)


1. श्रीमन्नारायणमूर्ति.एम्, संस्कृतभाषाशास्त्रोपोद्घातः (An Introduction to Sanskrit Linguistics), डि.के पब्लिकेषन्स्, दिल्ली 1984.
2. कुञ्जुण्णिराजा के, भारतीयाः अर्थसिद्धान्ताः (Indian Theories of Meaning), अडयार् लैब्ररि, चेन्नै 20, 1977
3. रोबिन्सन् आर् .एच्. भाषाशास्त्रस्य लघुचरित्रम् (A Short History of Linguistics), रौट्लेड्ज् पब्लिकेषन्स् लण्डन् 2013
4. प्रभाकरवार्यर् के. एम्, शान्ता अगस्टिन्, आधुनिकभाषाशास्त्रम् (ആധുനികഭാഷാശാസ്ത്രം), केरलभाषाइन्स्टिट्यूट्ट्, तिरुवनन्तपुरम् 1998
5. रामचन्द्र अय्यर् टिके तुलनात्मकभाषाशास्त्रम् (Comparative Philology), आर्एस् वाध्यार् सन्स् कल्पात्ति पालक्काट्, 1998

BLOCK-6

# अर्थपरिणतिशास्त्रम्

SGOU

# Unit-1
# अर्थपरिणतिशास्त्रम्

## उद्देश्यानि (Learning Outcomes)

- भाषापरिणतेः भेदं जानाति।
- भाषापरिणतेः कारणानि अवगच्छति।
- भाषाशास्त्रमधिकृत्य सामान्यपरिज्ञानं लभते।
- भाषाशास्त्रस्य लक्ष्यावगतिः।
- पदानामर्थव्यतियानं गृह्णाति।

## प्राग्व्यपेक्षाः (Pre requisites)

भाषाशास्त्रं नाम किमिति परिज्ञानमनिवार्यं भवति। कदा अस्य शास्त्रस्य उत्पत्तिरिति ज्ञातव्यम्। लोके प्रयुक्ताः सर्वा अपि भाषाः अनुस्यूतं परिणतिं भजन्ते। सा च भाषापरिणतिः स्वनपरा, व्याकरणपरा, अर्थपरा वा स्यात्। तदनुसारेण स्वनपरिणतिः, व्याकरणपरिणतिः, अर्थपरिणतिः इत्येवं सा बहुविधा भवति। पदानां कालानुसृतमर्थव्यतियानं प्रयोगं च संभवति। केन तत्संभवतीति अद्य पठामः।

## मुख्यपदानि (Key words)

स्वरूपम्, लक्षणा, पदस्य वैविध्यम्, शाब्दबोधविचारः, विवक्षितार्थसिद्धान्तः, आशयबोधन-सिद्धान्तः, वाक्यशास्त्रविदः, अन्वयाभिधानवादः, अभिहितान्वयवादः, अर्थसम्बन्धिवादद्वयम्।

## Discussion

### अर्थपरिणतिशास्त्रम् (Semantics)

भाषायाः मुख्यधर्मो हि आशयविनियमो नाम अथवा अर्थसूचनम्। अतः शब्दरूपस्य भाषायाः अर्थस्य च परस्परं यः कोऽपि सम्बन्धः स्यादेव। तदेव अर्थो नाम यमधिकृत्य अर्थपरिणतिशास्त्रे विचार्यते। अस्य नितरां दुष्करस्य क्लिष्टस्य च अर्थविषयकस्य शास्त्रीयमपग्रथनमद्यावधि न पूर्णतया निर्व्यूढो भवति। अर्थविचारविषये न केवलं शब्दव्यापारस्य किन्तु दर्शनानां मनःशास्त्रस्य तर्कशास्त्रस्य च उपयोगिता वर्तते। तथापि अर्थविचारविषये फ्रन्च् भाषाशास्त्रकारः ब्रील् नाम आचार्यः, अन्ये च बहवः पण्डिताः कृतश्रमाः भवन्ति। तत्र विवक्षितार्थसिद्धान्तः, आशयबोधन-सिद्धान्तः, एवं मानसिकप्रक्रियासिद्धान्तश्चेति बहुधा विचारः दृश्यते। भारतदेशेऽपि वैदिककालादरभ्य विषयोयं सूक्ष्मतया परामृष्टो भवति। वेदाङ्गेषु अन्यतमस्य यास्ककृतनिरुक्तशास्त्रस्य मुख्यप्रतिपाद्यं तावत् पदानां अर्थनिष्पत्तिमधिकृत्यैव भवति। एवं वैयाकरणैः, तार्किकैः तथा मीमांसकैरपि अस्मिन् विषये विचिन्तितवन्तः। तत्र पदस्य कुत्र शक्तिः, शक्तेः स्वरूपम्, लक्षणा, पदस्य वैविध्यम्, शाब्दबोधविचारः इत्यादिषु तेषां योगदानं महत्तरं भवति। मीमांसकानां तावत् वाक्यशास्त्रविदः इति प्रथापि अस्ति। तैः किल अन्वयाभिधानवादः, अभिहितान्वयवादश्चेति अर्थसम्बन्धिवादद्वयं प्रस्तुतं यदद्यापि साहित्यशास्त्रचिन्तासु अपि उपयोगि वर्तते।

**पुनरावृत्तिः (Recap)**

- भाषायाः मुख्यधर्मो हि आशयविनियमो नाम अथवा अर्थसूचनम्।
- अर्थव्यतियानमधिकृत्य अर्थपरिणतिशास्त्रे विचार्यते।
- अर्थविचारविषये न केवलं शब्दव्यापारस्य किन्तु दर्शनानां मनःशास्त्रस्य तर्कशास्त्रस्य च उपयोगिता वर्तते।
- तत्र विवक्षितार्थसिद्धान्तः, आशयबोधन-सिद्धान्तः, एवं मानसिकप्रक्रियासिद्धान्तश्चेति बहुधा विचारः दृश्यते।
- वेदाङ्गेषु अन्यतमस्य यास्ककृतनिरुक्तशास्त्रस्य मुख्यप्रतिपाद्यं तावत् पदानां अर्थनिष्पत्तिमधिकृत्यैव भवति।
- एवं वैयाकरणैः, तार्किकैः तथा मीमांसकैरपि अर्थपरिणति विषये विचिन्तितवन्तः।

## वस्तुनिष्ठप्रश्नाः (Answer to Objective type questions)

1. भाषायाः मुख्यधर्मः कः?
2. के नाम वाक्यशास्त्रविदः?
3. यास्केन कृतः अर्थसम्बन्धी ग्रन्थः कः?
4. प्रसिद्धः फ्रन्च् भाषाशास्त्रज्ञः कः?
5. यास्ककृतनिरुक्तशास्त्रस्य मुख्यप्रतिपाद्यविषयः कः ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
## (Answer the following questions in one or two sentences)

1. अर्थसम्बन्धिवादद्वयं किम्?

## निर्दिष्टाभ्यासाः (Assignments)

1. पदपदार्थसम्बन्धविषये सोदाहरणचर्चा।
2. अर्थपरिणतिशास्त्रं विशदयत।

## वस्तुनिष्टप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. आशयविनिमयः।
2. मीमांसकाः।
3. निरुक्तम्।
4. ब्रील्।

SGOU

5. पदानां अर्थनिष्पत्तिमधिकृत्य ।

## सूचनाग्रन्थाः (References)


1. श्रीमन्नारायणमूर्ति.एम्, संस्कृतभाषाशास्त्रोपोद्घातः (An Introduction to Sanskrit Linguistics), डि.के पब्लिकेषन्स्, दिल्ली 1984.
2. कुञ्चुण्णिराजा के, भारतीयाः अर्थसिद्धान्ताः (Indian Theories of Meaning), अडयार् लैब्ररि, चेन्नै 20, 1977
3. रोबिन्सन् आर् .एच्. भाषाशास्त्रस्य लघुचरित्रम् (A Short History of Linguistics), रौट्लेड्ज् पब्लिकेषन्स् लण्डन् 2013
4. प्रभाकरवार्यर् के. एम्, शान्ता अगस्टिन्, आधुनिकभाषाशास्त्रम् (ആധുനികഭാഷാശാസ്ത്രം), केरलभाषाइन्स्टिट्यूट्ट्, तिरुवनन्तपुरम् 1998
5. रामचन्द्र अय्यर् टिके तुलनात्मकभाषाशास्त्रम् (Comparative Philology), आर्एस् वाध्यार् सन्स् कल्पात्ति पालक्काट्, 1998

# Unit-2

# अर्थपरिणतेः वर्गीकरणम्- 1

## उद्देश्यानि (Learning Outcomes)

- भाषापरिणतेः भेदं जानाति।
- भाषापरिणतेः कारणानि अवगच्छति।
- भाषाशास्त्रमधिकृत्य सामान्यपरिज्ञानं लभते।
- भाषाशास्त्रस्य लक्ष्यावगतिः।
- अर्थपरिणतेः वर्गीकरणं जानाति।

## प्राग्व्यपेक्षाः (Prerequisites)

भाषाशास्त्रं नाम किमिति परिज्ञानमनिवार्यं भवति। कदा अस्य शास्त्रस्य उत्पत्तिरिति ज्ञातव्यम्। लोके प्रयुक्ताः सर्वा अपि भाषाः अनुस्यूतं परिणतिं भजन्ते। सा च भाषापरिणतिः स्वनपरा, व्याकरणपरा, अर्थपरा वा स्यात्। तदनुसारेण स्वनपरिणतिः, व्याकरणपरिणतिः, अर्थपरिणतिः इत्येवं सा बहुविधा भवति। अर्थपरिणतेः कारणानि, कीदृशानि व्यतियानानि संजातानि इत्यादिकानि कार्याणि अद्य पठामः।

## मुख्यविषयाः (Keywords)

अर्थपरिणतेः वर्गीकरणं, अर्थसङ्कोचः, अर्थविकासः, अर्थव्यतियानं, सूक्ष्मे सङ्कुचितेऽर्थे प्रयोगः, पङ्कजं, कुशलः, तैलम् इत्यादीनि।

## Discussion

### अर्थपरिणतेः वर्गीकरणम्

अर्थपरिणतिविषये सुमहान् विचारः दृश्यते। तत्र ढक्कर् महाशयेन अर्थपरिणतेः त्रिविधं वर्गीकरणं कृतम्। यथा- अर्थसङ्कोचः, अर्थविकासः, अर्थव्यतियानं चेति। तत्र अर्थसङ्कोचो नाम यत्र सामान्यार्थे प्रयुक्तस्य पदस्य पश्चात्काले केवलं सूक्ष्मे सङ्कुचिते अर्थे प्रयोगः। एवं प्रारम्भे सूक्ष्मार्थे प्रयुक्तस्य पदस्य यत्र अन्यपदार्थेषु अर्थविकासः स द्वितीयः। क्वचित्तु प्रारम्भे प्रस्तुतादर्थात् अन्यत्र अर्थे अर्थेषु वा अर्थव्यतियानमपि द्रष्टुं शक्यते तन्नाम अर्थव्यतियानम्। एतेषां त्रयाणामपि सोदाहरणं विचिन्तनमत्र प्रस्तूयते।

**अर्थसङ्कोचः (contraction of meaning)**

सामान्यार्थे विशालार्थे च निष्पन्नमपि पदं पश्चात्काले यत्र कुत्र विशेषार्थे नियमितश्चेत् तत्र अर्थसङ्कोचो नाम अर्थपरिणतिः। अस्य उदाहरणानि बहूनि सन्ति। यथा-

| **पदम्** | **सामान्यार्थः** | **विशेषार्थः** |
|---|---|---|
| माता | अन्तरिक्षम् | जननी |
| शकुनं | पक्षिणां डयनम् | शुभं वा दुष्टं शकुनम् |
| पङ्कजम् | पङ्के जातम् | कमलम् |
| मृगः | पशुसामान्यम् | हरिणः |
| वचनीयम् | वक्तव्यम् | निन्दा |
| विधवा | वञ्चिता स्त्री | भर्तृहीना |

एतेषु उदाहरणेषु कानिचन पङ्कजमृगविधवादि पदानि विशेषार्थे रूढाः भवन्तीति तादृशपदानां निरूढलक्षणेति व्यवहारः।

**अर्थविकासः (expansion of meaning)**

अर्थसङ्कोचवत् अर्थविकासोपि सुलभतरो भवति। अत्र सविशेषार्थे प्रयुक्तमपि पदं कालेन सामान्यार्थे बह्वर्थकं सञ्जायते इति विशेषः। यथा-

| पदम् | विशेषार्थः | सामान्यार्थः |
|---|---|---|
| मन्त्रः | वैदिकमन्त्रः | निगूढमायिकवचनम् |
| कुशलः | कुशग्रासग्राही | समर्थः |
| तैलम् | तिलात् भवम् | तैलसामान्यम् |
| दर्शनम् | नेत्रेण दर्शनम् | तत्त्वशास्त्रम् |
| गवेषणम् | गवाम् अन्वेषणम् | समीक्ष्य अध्ययनम् |
| प्रवीणः | प्रकृष्टः वीणायाम् | समर्थः |
| निष्णातः | विशेषेण स्नातः | समर्थः |

वस्तुतः भाषा नाम एतादृशैः लक्षणाप्रयोगैरेव मनोज्ञतरा भवतीति वक्तव्यमेव। साहित्यादिषु सर्वत्र एतादृशप्रयोगाणां सुलभतया उदाहरणानि सन्ति। मीमांसकेषु भाट्टाः भाषायां सर्वत्र लक्षणां स्वीकुर्वन्ति।

**पुनरावृत्तिः (Recap)**

- अर्थपरिणतेः त्रिविधं वर्गीकरणं- अर्थसङ्कोचः, अर्थविकासः, अर्थव्यतियानं चेति।
- सामान्यार्थे विशालार्थे च निष्पन्नमपि पदं पश्चात्काले यत्र कुत्र विशेषार्थे नियमितश्चेत् तत्र अर्थसङ्कोचो नाम अर्थपरिणतिः।

- अर्थसङ्कोचवत् अर्थविकासोऽपि सुलभतरो भवति। अत्र सविशेषार्थे प्रयुक्तमपि पदं कालेन सामान्यार्थे बह्वर्थकं सञ्जायते इति विशेषः।

**वस्तुनिष्ठप्रश्नाः (Answer to Objective type questions)**

1. अर्थपरिणतेः वर्गीकरणं कति विधम् ?
2. अर्थसङ्कोचस्य एकं उदाहरणं लिखत।
3. प्रवीणः इति पदस्य सामान्यार्थं विशेषार्थं च लिखत।

**एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।**
**(Answer the following questions in one or two sentences)**

1. अर्थपरिणतविभागाः के?
2. अर्थसङ्कोचो नाम किम्?
3. अर्थसङ्कोचस्य कतिपयानि उदाहरणानि लिखत।
4. अर्थविकासः नाम किम्?
5. अर्थव्यतियानं नाम किम्?

**निर्दिष्टाभ्यासाः (Assignments)**

अर्थपरिणतविभागं विशदयत।

**वस्तुनिष्टप्रश्नानाम्उत्तराणि (Answer to Objective type questions)**

1. त्रिविधम्।

2. पङ्कजम्।

3. प्रकृष्टः वीणायाम्, समर्थः।

## सूचनाग्रन्थाः (References)


1. श्रीमन्नारायणमूर्ति.एम्, संस्कृतभाषाशास्त्रोपोद्घातः (An Introduction to Sanskrit Linguistics), डि.के पब्लिकेषन्स्, दिल्ली 1984.
2. कुञ्चुण्णिराजा के, भारतीयाः अर्थसिद्धान्ताः (Indian Theories of Meaning), अडयार् लैब्ररि, चेन्नै 20, 1977
3. रोबिन्सन् आर् .एच्. भाषाशास्त्रस्य लघुचरित्रम् (A Short History of Linguistics), रौट्लेड्ज् पब्लिकेषन्स् लण्डन् 2013
4. प्रभाकरवार्यर् के. एम्, शान्ता अगस्टिन्, आधुनिकभाषाशास्त्रम् (ആധുനിക-ഭാഷാശാസ്ത്രം), केरलभाषाइन्स्टिट्यूट्ट्, तिरुवनन्तपुरम् 1998
5. रामचन्द्र अय्यर् टिके तुलनात्मकभाषाशास्त्रम् (Comparative Philology), आर्एस् वाध्यार् सन्स् कल्पात्ति पालक्काट्, 1998

# Unit-3

# अर्थपरिणतेः वर्गीकरणम्- 2

## उद्देश्यानि (Learning Outcomes)

- भाषापरिणतेः भेदान् जानाति।
- भाषापरिणतेः कारणानि अवगच्छति।
- भाषाशास्त्रमधिकृत्य सामान्यपरिज्ञानं लभते।
- भाषाशास्त्रस्य लक्ष्यावगतिः।
- अर्थव्यतियानस्य उदाहरणानि गृह्णाति।

## प्राग्व्यपेक्षाः (Pre requisites)

भाषाशास्त्रं नाम किमिति परिज्ञानमनिवार्यं भवति। कदा अस्य शास्त्रस्य उत्पत्तिरिति ज्ञातव्यम्। लोके प्रयुक्ताः सर्वा अपि भाषाः अनुस्यूतं परिणतिं भजन्ते। सा च भाषापरिणतिः स्वनपरा, व्याकरणपरा, अर्थपरा वा स्यात्। तदनुसारेण स्वनपरिणतिः, व्याकरणपरिणतिः, अर्थपरिणतिः इत्येवं सा बहुविधा भवति। उदाहरणैः साकम् अर्थव्यतियानं गृह्णाति। भाषायाः पोषणे एतादृशाभिः संजातं वर्धनं परिशोधयामः।

## मुख्यपदानि (Key words)

अर्थसङ्कोचः, अर्थविकासः, अर्थव्यतियानं, उपसर्गान्तरयोगः, ग्राम्यं, देवानां प्रियः, असुरः, ब्रील् महोदयः, अवस्थादेशकालभेदः, अनौचित्यपरिहारार्थम्।

## Discussion

## अर्थपरिणतेः वर्गीकरणम्

भाषापरिणतेः वैचित्र्यं अर्थपरिणामे खलु विस्मयावहं वर्तते। तत्र न केवलं अर्थसङ्कोचो अर्थविकासो वा भवति, किन्तु क्वचित् अर्थव्यतियानमपि द्रष्टुं शक्यते। अत्र अर्थस्य परिणामः न केवलं अर्थान्तरे किन्तु विरुद्धार्थे च संभवति। एवं च अर्थपरिणतेः अर्थव्यतियानं (transference of meaning) नाम भेदः सविशेषरूपमेव भवति। उदाहरणानि-

| **पदम्** | **मौलिकार्थः** | **परिणतार्थः** |
|---|---|---|
| ग्राम्यम् | ग्रामसम्बन्धि | असभ्यम् |
| कविः | पण्डितः | काव्यकर्ता |
| असुरः | देवः | राक्षसः |
| देवानां प्रियः | सज्जनः | मूर्खः |
| काकपक्षः | काकस्य पक्षः | शिरसि केशबन्धः |

एवं यद्यपि त्रिधा अर्थपरिणतिः निर्दिष्टा, तथापि अन्यभेदाः अपि वक्तुं शक्यन्ते। अत एव ब्रील् महोदयनेन अन्योदाहरणानि अपि दत्तानि। यथा एकस्मिन्नेवार्थे कवयः विभिन्नपदानि स्वीकुर्वन्ति- इद्रस्यैव शक्रः, वृत्रहा, वलारिः, पुरन्दरः, पुरुहूतः, देवराजः इत्यादि। एतच्च अवस्थादेशकालादिभेदेन अर्थभेदं सूचयितुं शक्ताः इति विशेषः। एवं संस्कृतभाषायां हरणार्थे प्रयुक्तः हृ धातुरेव उपसर्गान्तरयोगे नितरामर्थभेदं जनयति। तदुक्तम्- उपसर्गेण धात्वर्थो बलादन्यत्र नीयते। प्रहाराहारसंहारविहारपरिहारवत् इति।

एवं अनौचित्यपरिहारार्थमपि अर्थानां अन्यथाकथनमपि भाषासु सुलभमेव भवति। ब्रह्मबन्धुरित्यस्य यद्यपि ब्रह्मणः बन्धुरित्यर्थः तथापि मूढब्राह्मण इत्यर्थे अयं शब्दः रूढो भवति। एवं पूर्वोक्तं देवानां प्रियः इति पदं न देवप्रिये  किन्तु मुर्खे प्रयुक्तं भवति। मृतः इत्यर्थे पञ्चत्वं गतः, दिवं गतः इत्यादिप्रयोगाश्च एतस्य भङ्ग्यन्तरेण कथनस्य उदाहरणानि भवन्ति।

अन्यपदयोगेनापि पदानाम् अर्थभेदः सम्भवति। यथा -पत्रं इत्यस्य अर्थबहुत्वं प्रसिद्धमेव। वृक्षाणां वा पक्षिणां वा पत्रमिति अर्थभेदः प्रकटः। एवं श्लेषप्रयोगोऽपि भाषाविषये विशिष्य साहित्यादिषु नितरां दृश्यते। सोमः इत्यस्य चन्द्रः इति तथा उमया सह वर्तते इति शिवः इति चार्थपरिणतिः स्यात्। मानवपुरोगमने तस्य भाषायाः, अर्थस्य वा भेदः सम्भवत्येव। आधुनिककाले नूतनानां वस्तुविशेषाणाम् आशयानां वा संसूचनाया नूतनपदानां स्वीकरणं तथा कालेन अप्रयुक्तानां पदानां त्यजनमपि युक्तमेव प्रतिभाति।

## पुनरावृत्तिः (Recap)

- अर्थस्य परिणामः न केवलं अर्थान्तरे किन्तु विरुद्धार्थे च संभवति। एवं च अर्थपरिणतेः अर्थव्यतियानं नाम भेदः सविशेषरूपमेव भवति।
- यद्यपि त्रिधा अर्थपरिणतिः निर्दिष्टा, तथापि अन्यभेदाः अपि वक्तुं शक्यन्ते।
- संस्कृतभाषायां हरणार्थे प्रयुक्तः हृ धातुरेव उपसर्गान्तरयोगे नितरामर्थभेदं जनयति। तदुक्तम्- उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
- अन्यपदयोगेनापि पदानाम् अर्थभेदः सम्भवति।
- एवं श्लेषप्रयोगोपि भाषाविषये विशिष्य साहित्यादिषु नितरां दृश्यते।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. असुरपदस्य प्राचीनार्थः कः?
2. मूर्खः इत्यर्थे प्रयुक्तः शब्दः कः?
3. इन्द्रस्य किमपि नामान्तरं लिखत ?
4. पञ्चत्वं गतः इत्यस्य कः अर्थः?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. अर्थपरिणतेः भेदाः के ?
2. किं नाम अर्थव्यतियानम्?

## निर्दिष्टाभ्यासाः (Assignments)

1. सर्वेषां अर्थपरिणतीनाम् उदाहरणानि लिखतु।
2. अर्थव्यतियानस्य कारणानि कानि।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. देवः (असून् राति ददाति इति )।
2. देवानां प्रियः।
3. शक्रः।
4. मृतः।

## सूचनाग्रन्थाः (References)


1. श्रीमन्नारायणमूर्ति.एम्, संस्कृतभाषाशास्त्रोपोद्घातः (An Introduction to Sanskrit Linguistics), डि.के पब्लिकेषन्स्, दिल्ली 1984.
2. कुञ्चुण्णिराजा के, भारतीयाः अर्थसिद्धान्ताः (Indian Theories of Meaning), अडयार् लैब्ररि, चेन्नै 20, 1977
3. रोबिन्सन् आर् .एच्. भाषाशास्त्रस्य लघुचरित्रम् (A Short History of Linguistics), रौट्लेड्ज् पब्लिकेषन्स् लण्डन् 2013

4. प्रभाकरवार्यर् के. एम्, शान्ता अगस्टिन्, आधुनिकभाषाशास्त्रम्
(ആധുനികഭാഷാശാസ്ത്രം), केरलभाषाइन्स्टिट्यूट्ट्, तिरुवनन्तपुरम् 1998
5. रामचन्द्र अय्यर् टिके तुलनात्मकभाषाशास्त्रम् (Comparative Philology), आर्एस् वाध्यार्
सन्स् कल्पात्ति पालक्काट्, 1998

SGOU

# Unit-4
# अर्थपरिणतेः कारणानि

## उद्देश्यानि (Learning Outcomes)

- भाषापरिणतेः भेदान् जानाति।
- भाषापरिणतेः कारणानि जानाति।
- भाषाशास्त्रमधिकृत्य सामान्यपरिज्ञानम्।
- अर्थपरिणतेः सामान्य ज्ञानं अवगाहते।

## प्राग्व्यपेक्षाः (Pre requisites)

भाषाशास्त्रं नाम किमिति परिज्ञानमनिवार्यं भवति। कदा अस्य शास्त्रस्य उत्पत्तिरिति ज्ञातव्यम्। लोके प्रयुक्ताः सर्वा अपि भाषाः अनुस्यूतं परिणतिं भजन्ते। सा च भाषापरिणतिः स्वनपरा, व्याकरणपरा, अर्थपरा वा स्यात्। तदनुसारेण स्वनपरिणतिः, व्याकरणपरिणतिः, अर्थपरिणतिः इत्येवं सा बहुविधा भवति।

अर्थपरिणतिः सामान्यतः त्रिविधा इति, तथापि अन्यभेदाः च सन्तीति निर्दिष्टम्। तस्य कारणानि कानि इति पश्यामः।

## मुख्यपदानि (Key words)

अर्थपरिणतिः, अर्थसङ्कोचः, अर्थविकासः, अर्थव्यतियानः ,भङ्ग्यन्तरवाचां प्रयोगः, वक्रोक्तिः, ध्वनिः अर्थस्य अव्यक्तता, अर्थग्रहणे प्रमादः, सङ्गणकयन्त्रः।

## Discussion

### अर्थपरिणतेः कारणानि

अर्थपरिणतिः सामान्यतः त्रिविधा इति, तथापि अन्यभेदाः च सन्तीति निर्दिष्टम्। एतेषाम् अर्थसङ्कोचस्य अर्थविकासस्य अर्थव्यतियानस्य वा कानि कारणानि इति च आचार्यैः चिन्तितमेव। ते सामान्यतया कानिचित् कारणानि निर्दिष्टानि। तान्यत्र प्रस्तूयते।

1. लक्षणायाः तथा आलङ्कारिकाणां प्रयोगः- भाषासु सर्वत्र लक्षणा नितरामुपयुक्ता भवत्येव। वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति इति कुमारिलभट्टः। लावण्यादिपदेषु निरुढलक्षणा अस्तीति आनन्दवर्धानाचार्यः। एवं लक्षणा सर्वत्र भाषाव्यवहारे प्रयुक्ता भवति।

2. भङ्ग्यन्तरवाचां प्रयोगः- मृतः इत्यस्य स्थाने पञ्चत्वं गतः इत्यादि प्रयोगः यत्र भङ्ग्यन्तरेण कथनं दृष्टमेव। तव नाम किमिति प्रष्टव्ये संस्कृते भवतां नामाक्षऱाणि भवितुं लब्धभाग्यानि कानि इत्येवं प्रयोगः।

3. भाषायां विनयादिसंसूचनम्- त्वमिति वक्तव्ये भवान् तत्र भवान् इत्यादिप्रयोगः।

4. वक्रोक्तिः- प्रसिद्धाभिधां विहाय विचित्रतरामभिधां स्वीकृत्य कथनम् वक्रोक्तिः। यथा कामशत्रोः शिवस्य पार्वतीविवाहे स्मररिपुरिति कथनम्।

5. ध्वनिः- उपकृतं खलु तत्र किमुच्यते इत्युक्ते विपरीतलक्षणया अपकृतमित्यर्थः प्रतीयते। लीलाकमलपत्राणि गणयामास पार्वती इत्युक्ते तस्या लज्जा सूचिता भवति।

6. अर्थस्य अव्यक्तता- क्वचिदर्थस्य अव्यक्ततामाधारीकृत्य अर्थभेदः सम्भवति। यथा - उलूकजिता जितम् इति प्रयोगे उलूकशब्दस्य इन्द्रार्थः क्लिष्टः।

7. अर्थग्रहणे प्रमादः- क्वचित् अर्थग्रहणे प्रमादेन अन्यार्थग्रहणं सम्भवति। यथा स्वस्थाः भवन्तु धार्तराष्ट्राः इत्युक्ते स्वस्थाः इत्यस्य सुखस्थिताः वा स्वर्गस्थिताः(मृताः) वा इति अर्थशङ्का।

8. नूतनपदानामाशयानां वा स्वीकारः- आधुनिकशास्त्रविषये प्रयुक्तानां सङ्गणकयन्त्रादीनां पदानां ग्रहणम्।

9. वैकारिकावस्था- काव्यादिषु वैकारिकी भाषा एव सामान्यतः प्रयुज्यते। तत्र अर्थभेदः भवत्येव। विपरीतलक्षाणादिषु उदाहृतमेतत्।

## पुनरावृत्तिः (Recap)

- अर्थपरिणतिः सामान्यतः त्रिविधा इति, तथापि अन्यभेदाः च सन्तीति निर्दिष्टम्।
- एतेषाम् अर्थसङ्कोचस्य अर्थविकासस्य अर्थव्यतियानस्य वा कानि कारणानि इति च आचार्यैः चिन्तितमेव।
- लक्षणायाः तथा आलङ्कारिकाणां प्रयोगः।
- भङ्ग्यन्तरवाचां प्रयोगः।
- भाषायां विनयादिसंसूचनम्।
- प्रसिद्धाभिधां विहाय विचित्रतरामभिधां स्वीकृत्य कथनं वक्रोक्तिः।
- ध्वनिः-उपकृतं खलु तत्र किमुच्यते इत्युक्ते विपरीतलक्षणया अपकृतमित्यर्थः प्रतीयते।।
- अर्थग्रहणे प्रमादः अन्यार्थग्रहणं सम्भवति।
- अर्थस्य अव्यक्तता - क्वचिदर्थस्य अव्यक्ततामाधारीकृत्य अर्थभेदः सम्भवति।
- नूतनपदानामाशयानां वा स्वीकारः।
- वैकारिकावस्था- काव्यादिषु वैकारिकी भाषा एव सामान्यतः प्रयुज्यते।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1. के सर्वत्र लक्षणां स्वीकुर्वन्ति?
2. स्वस्थाः इति पदस्य अर्थद्वयम्?
3. उलूकजिता जितमित्यत्र उलूकपदस्यार्थः?
4. लीलाकमलपत्राणि गणयामास पार्वती इत्यत्र सूचितः भावः कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. स्मररिपुः इत्यस्य कोऽर्थः?
2. पञ्चत्वं गतः इत्यनेन विवक्षिताशयः कः?

## निर्दिष्टाभ्यासाः (Assignments)

1. अर्थपरिणतेः कारणान्यधिकृत्य चर्चा उदाहरणशेखरणं च।

## वस्तुनिष्ठप्रश्नानां उत्तराणि (Answer to Objective type questions)

1. भाट्टमीमांसकाः
2. सुखस्थिताः इति, स्वर्गस्थिताः इति वा।
3. इन्द्रः।
4. लज्जा।

## सूचनाग्रन्थाः (References)


1. श्रीमन्नारायणमूर्ति.एम्, संस्कृतभाषाशास्त्रोपोद्घातः (An Introduction to Sanskrit Linguistics), डि.के पब्लिकेषन्स्, दिल्ली 1984.
2. कुञ्जुण्णिराजा के, भारतीयाः अर्थसिद्धान्ताः (Indian Theories of Meaning), अडयार् लैब्ररि, चेन्नै 20, 1977
3. रोबिन्सन् आर् .एच्. भाषाशास्त्रस्य लघुचरित्रम् (A Short History of Linguistics), रौट्लेड्ज् पब्लिकेषन्स् लण्डन् 2013

4. प्रभाकरवार्यर् के. एम्, शान्ता अगस्टिन्, आधुनिकभाषाशास्त्रम् (ആധുനികഭാഷാശാസ്ത്രം), केरलभाषाइन्स्टिट्यूट्ट्, तिरुवनन्तपुरम् 1998
5. रामचन्द्र अय्यर् टिके तुलनात्मकभाषाशास्त्रम् (Comparative Philology), आर्एस् वाध्यार् सन्स् कल्पात्ति पालक्काट्, 1998

**Set-1**
**Model question paper**

# SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ………

Reg. No : ……….............
Name : ………………...

**FIFTH SEMESTER B.A. SANSKRIT EXAMINATION**

**DISCIPLINE SPECIFIC ELECTIVE COURSE**

**B21SN04DE संस्कृतभाषाशास्त्रम्**
**(CBCS - UG)**
**2022-23 - Admission Onwards**

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरी लिपिरुपयोक्तव्या।**

## SECTION - A
## (प्रथमो भागः)

**I. एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।** **(10x1=10)**
**(Answer any ten questions in a word or sentence)**

1. आधुनिकभाषाशास्त्रस्य आविष्कर्ता कः ?
2. भाषाशास्त्रे कति विभागाः सन्ति?
3. प्रकृतिप्रत्यादिभिः पदसंरचना भाषाशास्त्रस्य कस्य विभागस्य विषयः भवति ?
4. शिञ्जितम् इति कस्य भाषासिद्धान्तस्य उदाहरणम्?
5. 'फौण्डेषन्स् ओफ् लाङ्ग्वेजस्' इति ग्रन्थस्य कर्ता कः?
6. संस्कृतं .......भाषागणे अन्तर्भवति। (रिक्तं पूरयत)
7. ऋकारस्य उच्चारणावयवः कः ?
8. अनुदात्तसंज्ञा केन सूत्रेण विधीयते ?
9. शब्दोच्चारणावश्यकाः प्रयत्नाः कतिविधाः ? के च ते ?
10. तालव्यनियमसिद्धान्तस्य आविष्कर्ता कः?
11. स्वरकरणं नाम किम् ?

12. भाषापरिणतेः कति भेदाः सन्ति ? के च ते ?

13. यास्केन कृतः अर्थसम्बन्धी ग्रन्थः कः?

14. स्वस्थाः इति पदस्य अर्थद्वयम् किम् ?

15. असुरपदस्य प्राचीनार्थः कः ?

**SECTION - B**

**(द्वितीयो भागः)**

**II.एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत। (5x2=10)**

**(Answer any five questions in one or two sentences)**

16. तुलनात्मकभाषापठनं नाम किम् ?

17. पदनिष्पत्तिप्रकारशास्त्रस्य विषयः कः?

18. चिह्नशास्त्रं नाम किम् ?

19. चिन्तासंप्रेषणस्य तिस्रः अवस्थाः काः ?

20. स्पर्शाः के ?

21. पतनोद्गमनवृत्तिः नाम किम् ?

22. ध्वनिसम्बन्धी परिणामः नाम किम्?

23. द्वादश इत्यत्र द्वा इतिदीर्घस्यागमनं कथं जातम् ?

24. अर्थसङ्कोचो नाम किम् ?

25. पञ्चत्वं गतः इत्यनेन विवक्षिताशयः कः?

**SECTION - C**

**(तृतीयो भागः)**

**III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत। (6x5=30)**

**(Answer any six questions)**

26. भाषाशास्त्रस्य लक्ष्यं व्याप्तिं च विशदयत।

27. बौ-वौ सिद्धान्तमधिकृत्य विशदयत।

28. लेखनभाषामधिकृत्य विशदयत।



SGOU

29. केल्टिक् शाखां विशदयत।

30. तोक्केरियन् शाखां विशदयत।

31. स्वरवर्णान् विशदयत।

32. वृत्तिद्वयम् उदात्तादि भेदेन विभज्य विशदीकुरुत।

33. आभ्यन्तरप्रयत्नस्य प्रयोगप्रकारान् विशदयत।

34. तालव्यनियमं विशदयत।

35. अर्थपरिणतिशास्त्रं विशदयत।

36. पदपदार्थसम्बन्धविषये सोदाहरणं विचारयत।

37. अर्थव्यतियानस्य कारणानि कानि ?

## SECTION - D

## (चतुर्थो भागः)

**IV. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकमुत्तरं लिखत।** **(2x10=20)**

**(Write an essay on any two of the following)**

38. परम्परागतभाषापठनं तुलनात्मकपठनात् कथं भिद्यते इति विशदयत।

39. भाषायाः उत्पत्तिसिद्धान्तान् विशदयत।

40. इन्डोयूरोप्यन् भाषापरिवारस्य विशेषगुणान् विशदयत।

41. शब्दपरिणामविषये ध्वनेः प्राधान्यं विशदयत।

**Set-2**
**Model question paper**

# SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ………                                        Reg. No : ………...............
                                                      Name : ………………...

**FIFTH SEMESTER B.A. SANSKRIT EXAMINATION**
**DISCIPLINE SPECIFIC ELECTIVE COURSE**

**B21SN04DE संस्कृतभाषाशास्त्रम्**
**(CBCS - UG)**
**2022-23 - Admission Onwards**

**Time: 3 Hours**                                        **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः । संस्कृतलेखने देवनागरी लिपिरुपयोक्तव्या ।**

## SECTION - A
## (प्रथमो भागः)

I. **एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत ।** **(10x1=10)**
**(Answer any ten questions in a word or sentence)**

1. घटनावादस्य उपस्थापकः कः ?
2. अर्थविपरिणामप्रकारविचारः केन शास्त्रेण सम्बद्धः अस्ति ?
3. केन मार्गेण पूर्विकभाषा पुनराविष्क्रियते ?
4. अन्यानि व्याकरणानि अपेक्ष्य शास्त्रीयं व्याकरणं किम् ?
5. इन्डो-यूरोप्यन् भाषाशाखासु प्रत्ययवक्रता कतिविधम्? के च ते ?
6. "न केवलं प्रकृतिः प्रयोक्तव्या न च केवलाः प्रत्ययाः" इति प्रमाणं केन उक्तम् ?
7. ऊष्माणः वर्णाः के ?
8. मात्रोच्चारणकाले कण्ठगोलके ..........प्रतीतिः वरीवर्ति । (रिक्तं पूरयत ।)
9. अनुस्वारस्य (म्) उच्चारणावयवः कः ?
10. भाषापरिणतनियमस्य आचार्यः कः ?
11. वर्णविपर्ययः नाम किम् ?
12. भाषापरिणतेः मुख्यं कारणं किम् ?

13. इन्द्रस्य किमपि नामान्तरं लिखत ?

14. अर्थपरिणतेः वर्गीकरणं कति विधम् ?

15. प्रसिद्धः फ्रन्च् भाषाशास्त्रज्ञः कः ?

## SECTION- B

## (द्वितीयो भागः)

**II.एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत। (5x2=10)**

**(Answer any five questions in one or two sentences)**

16. तुलनात्मकपठने केषु विषयेषु तुलना क्रियते ?

17. भाषाशास्त्रस्य विभागाः के ?

18. किम् नाम घटनाद्वैविध्यम् ?

19. भाषायाः महत्वं प्रतिपादयत।

20. बाह्यप्रयत्नः कति विधः ? के च ते ?

21. का नाम स्वरबलावृत्तिः?

22. पत्युरित्यत्र कीदृशः सादृश्यविचारः ?

23. पत्युरित्यत्र कीदृशः सादृश्यविचारः ?

24. अर्थव्यतियानं नाम किम् ?

25. अर्थसम्बन्धिवादद्वयं किम् ?

## SECTION- C

## (तृतीयो भागः)

**III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत। (6x5=30)**

**(Answer any six questions)**

26. साम्प्रदायिकव्याकरणमधिकृत्य विशदयत।

27. डिङ्- डोङ् सिद्धान्तं विशदयत।

28. पू- पू सिद्धान्तमधिकृत्य विशदयत।

29. जेर्मानिक् अथवा ट्यूटोणिक् शाखां विशदयत।

30. अर्मेनियन् शाखां विशदयत।

31. का नाम स्वरबलावृत्तिः?

32. बाह्यप्रयत्नस्य प्रयोगप्रकारान् विशदयत।

33. वृत्तिद्वयम् उदात्तादि भेदेन विभज्य विशदीकुरुत।

34. भाषापरिणतेः कारणानि आधारीकृत्य सोदाहरणं चर्चा क्रियताम्।

35. तालव्यनियमं विशदयत।

36. भाषाव्यवहारे सादृश्यविचारस्य प्राधान्यमधिकृत्य विचारयत।

37. अर्थपरिणतेः कारणान्यधिकृत्य विचारयत।

## SECTION- D

## (चतुर्थो भागः)

**IV. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकमुत्तरं लिखत।** **(2x10=20)**

**(Write an essay on any two of the following)**

38. भाषाशास्त्रस्य स्वभावं सविशेषताश्च विशदयत।

39. भाषापठनसम्बद्धानि कार्याणि विशदयत।

40. इन्डोयूरोप्यन् भाषापरिवारस्य विभजनं विशदयत।

41. अर्थपरिणतविभागं विशदयत।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

संस्कृतभाषाशास्त्रम्

COURSE CODE: B21SN04DE

SGOU

YouTube

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841

ISBN 978-81-982562-6-3